# सत्यनारायणपूजा

5/6/2012

अशोधिता परिष्कार्या कृतिः

# विषयानुक्रमणिका


पूजामण्डलम् ........................................ 4
सत्यनारायणपूजा ........................................ 5
ब्राह्मणवन्दनम् ........................................ 5
आसनविधिः ........................................ 5
सङ्कल्पः ........................................ 6
गणेशपूजनम् ........................................ 7
शुद्धिपुण्याहमन्त्राः ........................................ 10
पुण्याहमन्त्राः ........................................ 11
साधारणन्यासः ........................................ 12
षडङ्गन्यासः ........................................ 13
अष्टाक्षरन्यासः ........................................ 13
कलशपूजा ........................................ 14
शङ्खशपूजा ........................................ 15
आत्मपूजा ........................................ 15
मण्डपपूजा ........................................ 16
द्वारपालपूजा ........................................ 16
पीठपूजा ........................................ 16
वरुणपूजा ........................................ 16
प्रथमावरणदेवताः ........................................ 19
नवग्रहदेवताः ........................................ 20
दिग्पालकदेवताः ........................................ 23
षट्कोणदेवताः ........................................ 24
प्रधानकलशपूजा ........................................ 25
पञ्चामृतस्नानम् ........................................ 28

पञ्चोदकस्नानम्........................................................ 30
शुद्धोदकस्नानम् ........................................................ 30
ब्रह्मसूक्तम्........................................................ 31
विष्णुसूक्तम् ........................................................ 31
रुद्रसूक्तम्........................................................ 32
पुरुषसूक्तम्........................................................ 33
उत्तरनारायणम् ........................................................ 34
नारायणसूक्तम्........................................................ 35
श्रीसूक्तम् ........................................................ 36
महाभिषेकः ........................................................ 37
वस्त्रसमर्पणादि ........................................................ 37
सौभाग्यद्रव्यार्पणम् ........................................................ 39
अक्षतसमर्पणादि ........................................................ 40
पत्रपुष्पाङ्गपूजाः ........................................................ 41
आवरणपूजा ........................................................ 42
द्वादशनामपूजा........................................................ 44
अष्टोत्तरशतनामपूजा ........................................................ 45
शतनामोत्तरपूजा........................................................ 45
प्रार्थना ........................................................ 48
कथानुवादः (१)........................................................ 50
कथानुवादः (२) ........................................................ 51
कथानुवादः (३) ........................................................ 52
कथानुवादः (४) ........................................................ 53
कथानुवादः (५) ........................................................ 53
पुनःपूजा ........................................................ 54
प्रोक्षणप्राशने ........................................................ 58
व्रतकथा........................................................ 59

प्रथमोऽध्यायः ........................................................ 59
द्वितीयोऽध्यायः ........................................................ 64
तृतीयोऽध्यायः ........................................................ 69
चतुर्थोऽध्यायः ........................................................ 79
पञ्चमोऽध्यायः ........................................................ 86
जन्मान्तरानि ........................................................ 90

# पूजामण्डलम्


E
सूर्यः
इन्द्रः
चन्द्रः
ईशान
अग्निः
केतुः
राहुः
कुजः
गणेश
गौरी
कामः
भूमिः
सत्यनारायणः
लक्ष्मी
गरुडः
सोमः
यमः
बुधः

# सत्यनारायणपूजा

## ब्राह्मणवन्दनम्

भा॒ग॒धेये॑नै॒वैनं॒ प्रण॑यति। ब्रा॒ह्म॒ण आ॑र्षे॒य उद्ध॑रेत्। ब्रा॒ह्म॒णो वै सर्वा॑ दे॒वताः॑। सर्वा॑भिरे॒वैनं॑ दे॒वता॑भि॒रुद्ध॑रति॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ये अ॒र्वाङु॑त वा॑ पु॒राणे॑ वे॒दं वि॒द्वाꣳस॑म॒भितो॑ वदन्त्यादि॒त्यमे॒व ते परि॑वदन्ति॒ सर्वे॑ अ॒ग्निं॑ द्वि॒तीयं॑ तृ॒तीयं॑ च ह॒ꣳसमिति॒ याव॑ती॒र्वै दे॒वता॒स्ताः सर्वा॑ वेद॒विदि॑ ब्राह्म॒णे व॑सन्ति॒ तस्मा॑द् ब्राह्म॒णेभ्यो॑ वेद॒विद्भ्यो॑ दि॒वे दि॑वे॒ नम॑स्कुर्या॒न्नाश्ली॒लं की॑र्तयेदे॒ता ए॒व दे॒वताः॑ प्रीणाति॥

आब्रह्मलोकादाशेषादालोकालोकपर्वतात् ।
ये वसन्ति द्विजा देवास्तेभ्यो नित्यं नमो नमः ॥

## आसनविधिः

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया ॥

उग्रभूतपिशाचाद्या ये च वै भूमिधारकाः ।
एतेषामविरोधेन ब्रह्मकर्म समारभे ॥

आसनमहामन्त्रस्य पृथिव्या मेरुपृष्ठऋषिः, सुतलं छन्दः, कूर्मो देवता, आसने विनियोगः।

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

# सङ्कल्पः

घण्टानादं कुर्यात् –
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
देवतापूजनार्थाय घण्टानादं करोम्यहम् ॥
ॐ फट्

(ऋ॰) येभ्यो᳚ मा॒ता मधु॑म॒त्पिन्व॑ते॒ पय॑ः पी॒यूषं॒ द्यौरदि॑ति॒रद्रि॑बर्हाः। उ॒क्थशु॑ष्मान् वृषभ॒रान् स्वप्न॑स॒स्ताँ आ॑दि॒त्याँ अनु॑ मदा स्व॒स्तये᳚॥ ए॒वा पि॒त्रे वि॒श्वदे᳚वाय॒ वृष्णे᳚ य॒ज्ञैर्वि॑धेम॒ नम॑सा ह॒विर्भि॑ः। बृह॑स्पते सुप्र॒जा वी॒रव᳚न्तो व॒यं स्या᳚म॒ पत॑यो र॒यीणाम्॥

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं
सत्यनारायणपूजां यथाशक्ति करिष्ये ।

पर्वत इवाविचाचलिः। इन्द्र इवेह ध्रुवस्तिष्ठ। इह राष्ट्रमु धारय। अभितिष्ठ पृतन्यतः। अधरे सन्तु शत्रवः। इन्द्र इव वृत्रहा तिष्ठ॥ सुमुहूर्तोऽस्तु। सुप्रतिष्ठितमस्तु॥

# गणेशपूजनम्

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

धूम्रकेतुर्गणाध्यक्षो फालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

अभीप्सितार्थसिध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

हरिद्राभं चतुर्बाहुं हरिद्रवदनं प्रभुम् ।
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ॥

विघ्नेश्वरं ध्यायामि। आवाहयामि। आसनं समर्पयामि। पाद्यं समर्पयामि। अर्घ्यं समर्पयामि। आचमनं समर्पयामि। स्नानं समर्पयामि।

भ॒द्रं कर्णे॑भिः शृणु॒याम॑ देवाः। भ॒द्रं प॑श्येमा॒क्षभि॒र्यज॑त्राः। स्थि॒रैरङ्गै॑स्तुष्टु॒वाꣳस॑स्त॒नूभिः॑। व्यशे॑म दे॒वहि॑तं॒ यदायुः॑॥ स्व॒स्ति न॒ इन्द्रो॑ वृ॒द्धश्र॑वाः। स्व॒स्ति नः॑ पू॒षा वि॒श्ववे॑दाः। स्व॒स्ति॒न॒स्तार्क्ष्यो॒ अरि॑ष्टनेमिः। स्व॒स्ति नो॒ बृह॒स्पति॑र्दधातु॥

नम॑स्ते ग॒णप॑तये। त्वमे॒व प्र॒त्यक्षं॒ तत्त्व॑मसि। त्वमे॒व के॒वलं॒ कर्ता॑ऽसि। त्वमे॒व के॒वलं॒ धर्ता॑ऽसि। त्वमे॒व के॒वलं॒ हर्ता॑ऽसि। त्वमेव सर्वं खल्विदं॑ ब्रह्मा॒सि। त्वं साक्षादात्मा॑ऽसि नि॒त्यम्। ऋ॑तं व॒च्मि। स॑त्यं व॒च्मि। अ॒व त्वं॒ माम्। अव॑ व॒क्तार॑म्। अव॑ श्रो॒तार॑म्। अव॑ दा॒तार॑म्। अव॑ धा॒तार॑म्। अवानूचानम॑व शि॒ष्यम्। अव॑ प॒श्चात्ता॑त्। अव॑ पु॒रस्ता॑त्। अवोत्त॒रात्ता॑त्। अव॑ दक्षि॒णात्ता॑त्। अव॑ चो॒र्ध्वात्ता॑त्। अवाध॒रात्ता॑त्। सर्वतो मां पाहि पाहि॑ सम॒न्तात्। त्वं वाङ्मय॑स्त्वं चिन्म॒यः। त्वमानन्दमय॑स्त्वं ब्रह्म॒मयः। त्वं सच्चिदानन्दाद्वि॑तीयो॒ऽसि। त्वं प्र॒त्यक्षं॒ ब्रह्मा॑सि। त्वं ज्ञानमयो विज्ञान॑मयो॒ऽसि। सर्वं जगदिदं त्व॑त्तो जा॒यते। सर्वं जगदिदं त्व॑त्तस्ति॒ष्ठति। सर्वं जगदिदं त्वयि लय॑मेष्य॒ति। सर्वं जगदिदं त्वयि॑ प्रत्ये॒ति। त्वं भूमिरापोऽनलोऽनि॑लो न॒भः। त्वं चत्वारि वा॑क्पदा॒नि। त्वं गु॒णत्र॑यातीतः। त्वमवस्थात्र॑यातीतः। त्वं दे॒हत्र॑यातीतः। त्वं का॒लत्र॑यातीतः। त्वं मूलाधारे स्थितो॑ऽसि

नित्यम्। त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवःस्वरोम्।

गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण ऋद्धम्। एतत् तव मनुस्वरूपम्। गकारः पूर्वरूपम्। अकारो मध्यमरूपम्। अनुस्वारश्चान्त्यरूपम्। बिन्दुरुत्तररूपम्। नादः सन्धानम्। सꣳहिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचृद्गायत्रीच्छन्दः। गणपतिर्देवता। ॐ गं गणपतये नमः॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्। रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम्। रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्। भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्। आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात् परम्। एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥

नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः॥ य एवं वेद। इत्युपनिषत्॥

सुमुखाय नमः। एकदन्ताय नमः। कपिलाय नमः। गजकर्णाय नमः। लम्बोदराय नमः। विकटाय नमः। विघ्नराजाय नमः। विनायकाय नमः। धूमकेतवे नमः। गणाध्यक्षाय नमः।

फालचन्द्राय नमः। गजाननाय नमः। वक्रतुण्डाय नमः।
शूर्पकर्णाय नमः। हेरम्बाय नमः। स्कन्दपूर्वजाय नमः।
सिद्धिविनायकाय नमः॥

वस्त्रं समर्पयामि। धूपं आघ्रापयामि। दीपं दर्शयामि। मन्त्रपुष्पं समर्पयामि। नीराजनं समर्पयामि।

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ।
अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ अविघ्नमस्तु॥

# शुद्धिपुण्याहमन्त्राः

आपो॒ हि ष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन। म॒हे रणा॑य॒ चक्ष॑से॥
यो व॑ः शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ह न॑ः। उ॒श॒तीरि॑व मा॒तर॑ः॥
तस्मा॒ अर॑ं गमामवो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ। आपो॑ ज॒नय॑था च
नः॥

ऋ॒तं च॑ स॒त्यं चा॒भी᳚द्धा॒त् त॒पसोध्य॑जायत। ततो॒ रात्रि॑रजायत॒
तत॑ः समु॒द्रो अ॑र्ण॒वः॥ स॒मु॒द्राद॑र्ण॒वादधि॑ संवत्स॒रो अ॑जायत।
अ॒हो॒रा॒त्राणि॑ वि॒दध॒द् विश्व॑स्य मिष॒तो व॒शी॥ सू॒र्या॒च॒न्द्र॒मसौ॑ धा॒ता
य॑था पू॒र्वम॑कल्पयत्। दिव॑ं च पृथि॒वीं चा॒न्तरि॑क्ष॒मथो॒ सुव॑ः॥

क्षेत्र॑स्य॒ पति॑ना व॒यꣳ हि॒तेने॑व जयामसि। गामश्व॑ं पोषयि॒त्वा स
नो॑ मृडाती॒दृशे᳚॥

वास्तोष्पते प्रति जानीह्यस्मान् स्वावेशो अनमीवो भवा नः।
यत्त्वेमहे प्रति तं नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे॥
वास्तोष्पते शग्मया सꣳ सदा ते सक्षीमहि रण्वया गातुमत्या।
आ वः क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः॥
वास्तोष्पते प्रतरणो न एधि गोभिरश्वेभिरिन्दो। अजरासस्ते सख्ये
स्याम पितेव पुत्रान् प्रति नो जुषस्व॥ अमीवहा वास्तोष्पते
विश्वा रूपाण्या विशन्। सखा सुशेव एधि नः। शिवꣳ शिवम्॥

# पुण्याहमन्त्राः

यत्पुण्यं नक्षत्रम्। तद्बट्कुर्वीतोपव्युषम्। यदा वै सूर्य उदेति। अथ
नक्षत्रं नैति। यावति तत्र सूर्यो गच्छेत्। यत्र जघन्यं पश्येत्।
तावति कुर्वीत यत्कारी स्यात्। पुण्याह एव कुरुते॥ तानि वा
एतानि यमनक्षत्राणि। यान्येव देवनक्षत्राणि। तेषु कुर्वीत यत्कारी
स्यात्। पुण्याह एव कुरुते॥

स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति
नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ अष्टौ देवा
वसवः सोम्यासः। चतस्रो देवीरजराः श्रविष्ठाः। ते यज्ञं पान्तु
रजसः परस्तात्। संवत्सरीणममृतꣳ स्वस्ति॥

ऋध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु।
अनूराधान् हविषा वर्धयन्तः। शतं जीवेम शरदः सवीराः॥ त्रीणि

त्रीणि वै देवानामृद्धानि। त्रीणि छन्दांꣳसि। त्रीणि सवनानि। त्रय इमे लोकाः। ऋध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति॥

श्रिये जातः श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु। श्रियं वसाना अमृतत्वमायन् भजन्ति सद्यः संविता विदध्यून्॥ श्रियं एवैनं तच्छ्रियामादधाति। सन्ततमृचा वषट्कृत्यं सन्धत्तं सन्धीयते प्रजया पशुभिः। य एवं वेद॥ यस्मिन् ब्रह्माभ्य जयत्सर्वमेतत्। अमुं च लोकमिदमूच सर्वम्। तन्नो नक्षत्रमभिजिद् विजित्य। श्रियं दधात्वहृणीयमानम्॥ अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रै विदा विदुः। ऋचः सामानि यजूꣳषि। सा हि श्रीरमृतासताम्॥

# साधारणन्यासः

अग्निर्मे वाचि श्रितः। वाग्घृदये।
हृदयं मयि। अहममृतं। अमृतं ब्रह्मणि॥

वायुर्मे प्राणे श्रितः। प्राणो हृदये। °
सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये। °
चन्द्रमा मे मनसि श्रितः। मनो हृदये। °
दिशो मे श्रोत्रे श्रिताः। श्रोत्रꣳ हृदये। °
आपो मे रेतसि श्रिताः। रेतो हृदये। °
पृथिवी मे शरीरे श्रिता। शरीरꣳ हृदये। °
ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये। °

इन्द्रो मे बले श्रितः। बलं हृदये। ०
पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। ०
ईशानो मे मन्यौ श्रितः। मन्युर्हृदये। ०
आत्मा म आत्मनि श्रितः। आत्मा हृदये। ०

पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्। वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः।

## षडङ्गन्यासः

"अतो देवाः" इति षडङ्गन्यासं कृत्वा –

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः॥ इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम्। समूढमस्य पांसुरे॥ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। ततो धर्माणि धारयन्॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत् परमं पदम्॥

## अष्टाक्षरन्यासः

अष्टाक्षरन्यासं कृत्वा –

ॐ नमः (मूर्ध्नि)। ॐ नं नमः (नेत्रयोः)। ॐ मों नमः (मुखे)। ॐ नां नमः (हृदये)। ॐ रां नमः (नाभौ)। ॐ यं

नमः (गुह्ये)। ॐ णां नमः (जान्वोः)। ॐ यं नमः
(पादयोः)।

# कलशपूजा

आपो॒ वा इ॒दꣳ सर्वं॒ विश्वा॑ भू॒तान्याप॑ः प्रा॒णा वा आप॑ः प॒शव॒
आपो॒ऽन्नमापो॒ऽमृत॒माप॑ः स॒म्राडापो॑ वि॒राडाप॑ः
स्व॒राडाप॒श्छन्दा॒ꣳस्यापो॒ ज्योती॒ꣳष्यापो॒ यजू॒ꣳष्याप॑ः स॒त्यमाप॒ः
सर्वा॑ दे॒वता॒ आपो॒ भूर्भुव॒ःसुव॒राप॒ ओम्॥

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ।
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सुन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितस्तीर्थानि च ह्रदा नदाः ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥

# शङ्खपूजा

शङ्खं चन्द्रार्कदैवत्यं मध्ये वरुणसंयुतम् ।
पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ।
शङ्खे तिष्ठन्ति विप्रेन्द्रास्तस्माच्छङ्खं प्रपूजयेत् ॥

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तु ते ॥

गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा ।
तव नादेन पाताले पाञ्चजन्य नमोऽस्तु ते ॥

अ॒ग्निर्म॑न्वे प्र॒थ॒मस्य॒ प्रचे॑तसो॒ यं पाञ्च॑जन्यं ब॒हवः॑ समि॒न्धते॑।
विश्व॑स्यां वि॒शि प्र॑विविशि॒वाꣳ स॑मीमहे॒ स नो॑ मुञ्च॒त्वꣳह॑सः॥

# आत्मपूजा

आत्मने नमः। अन्तरात्मने नमः। परमात्मने नमः। शुद्धात्मने नमः। ज्ञानात्मने नमः॥

देहो देवालयः प्रोक्तो जीवो देवः सनातनः।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत्॥

ब्रह्मा॒हम॑स्मि। अ॒हम॑स्मि॒ ब्रह्मा॒हम॑स्मि।

# मण्डपपूजा

०

# द्वारपालपूजा

द्वारपालपूजां कुर्यात् –

नन्दाय नमः, सुनन्दाय नमः, पूर्वद्वारलक्ष्म्यै नमः।

चण्डाय नमः, प्रचण्डाय नमः, दक्षिणद्वारलक्ष्म्यै नमः।

बलाय नमः, प्रबलाय नमः, पश्चिमद्वारलक्ष्म्यै नमः।

भद्राय नमः, सुभद्राय नमः, उत्तरद्वारलक्ष्म्यै नमः।

# पीठपूजा

मण्डपमध्ये पीठं संस्थाप्य पूजयेत् –

नवशक्तिपूजां करिष्ये – ॐ विमलायै नमः, उत्कर्षिण्यै नमः, ज्ञानायै नमः, क्रियायै नमः, यौगायै नमः, प्रह्व्यै नमः, सत्यायै नमः, ईशानायै नमः, अनुग्रहायै नमः॥ ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठात्मने नमः। सुवर्णपीठं कल्पयामि॥

# वरुणपूजा

पीठोपरि षट्कोणवृत्ताष्टदलवृत्तात्मकं सत्यनारायणं यन्त्रं विलिख्य,

उत्तप्तोज्ज्वल° साधकः

स्वामिन् सर्वजगन्नाथ यावत् पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन यन्त्रेऽस्मिन् सन्निधिं कुरु ॥

आपो॒ वा इ॒दꣳ सर्वं॒ विश्वा॑ भू॒तान्याप॑ः प्रा॒णा वा आप॑ः प॒शव॒ आपोऽन्न॒मापोऽमृ॑त॒माप॑ः स॒म्राडापो॑ वि॒राडाप॑ः स्व॒राडाप॒श्छन्दा॒ꣳस्यापो॒ ज्योती॒ꣳष्यापो॒ यजू॒ꣳष्याप॑ः स॒त्यमाप॒ः सर्वा॑ दे॒वता॒ आपो॒ भूर्भुव॒ः सुव॒राप॒ ओम्॥

अ॒पः प्रण॑यति। श्र॒द्धा वा आप॑ः। श्र॒द्धामे॒वारभ्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। य॒ज्ञो वा आप॑ः। य॒ज्ञमे॒वारभ्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। वज्रो॒ वा आप॑ः। वज्र॑मे॒व भ्रातृ॑व्येभ्यः प्र॒हृत्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। आपो॒ वै र॑क्षो॒घ्नीः। रक्ष॑सा॒मप॑हत्यै। अ॒पः प्रण॑यति। आपो॒ वै द॒वाना॑ᳶ प्रि॒यं धाम॑। दे॒वाना॑मे॒व प्रि॒यं धाम॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। आपो॒ वै सर्वा॑ दे॒वता॑ः। दे॒वता॑ ए॒वारभ्य॑ प्र॒णीय॒ प्रच॑रति। अ॒पः प्रण॑यति। आपो॒ वै शा॒न्ताः। शा॒न्ताभि॑रे॒वास्य॒ शुच॑ꣳ शमयति॥

दे॒वो व॑ः सवि॒तोत्पु॑नातु। अच्छि॑द्रेण प॒वित्रे॑ण। वसो॒ः सूर्य॑स्य र॒श्मिभि॑ः॥ स हि रत्ना॑नि दा॒शुषे॑ सु॒वाति॑ सवि॒ता भग॑ः। तं भा॒गं चि॒त्रमी॑महे॥

कूर्चाग्रै राक्षसान् घोरान् छिन्धि कर्म विघातिनः ।
त्वामर्पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि ॥

वृक्षराजसमुद्भूताः शाखायाः पल्लवत्त्वचः ।
युष्मान् कुम्भेष्वर्पयामि सर्वदोषापनुत्तये ॥

नालिकेरसमुद्भूत त्रिणेत्र हरसंमत ।
शिखया दुरितं सर्वं पापं पीडां च मे नुद ॥

नागपाशधरं देवं रत्नौघद्युतिविग्रहम् ।
शशाङ्कधवलं ध्यायेद् वरुणं मकरासनम् ॥

पाशहस्तं च वरुणं यादसामम्भसां पतिम् ।
आवाहयामि कुम्भेऽस्मिन् देवं मकरवाहनम् ॥

इ॒मं मे॑ वरुण श्रुधी॒ हव॑म॒द्या च॑ मृडय। त्वाम॑व॒स्युरा च॑के॥
तत्त्वा॑यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदाशा॑स्ते॒ यज॑मानो ह॒विर्भिः॑।
अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳ स॒मान॒ आयुः॒ प्रमो॑षीः॥

पाशहस्तं च वरुणं यादसामम्भसां पतिं ।
आवाहयामि कुम्भेऽस्मिन् देवं मकरवाहनम् ॥

वरुणं ध्यायामि। आवाहयामि। आसनं समर्पयामि। पाद्यं समर्पयामि। अर्घ्यं समर्पयामि। आचमनं समर्पयामि। स्नानं समर्पयामि। वस्त्यं समर्पयामि। उपवीतं समर्पयामि। गन्धान् धारयामि। कुङ्कुमं समर्पयामि। धूपं आघ्रापयामि। दीपं दर्शयामि।

वरुणाय नमः। प्रचेतसे नमः। सुरूपिणे नमः। अपां पतये नमः। मकरवाहनाय नमः। जलाधिपतये नमः। पाशहस्ताय नमः।

पुष्पाणि समर्पयामि। नीराजनं समर्पयामि। मन्त्रपुष्पं समर्पयामि।

# प्रथमावरणदेवताः

षट्कोणेषु पूर्वादिक्रमेण – गणेशं, गौरीं, वाणीं, ब्रह्माणं, विष्णुं, रुद्रम्॥

ग॒णानां᳚ त्वा ग॒णप॑तिꣳ हवामहे क॒विं क॑वी॒नामु॑प॒मश्र॑वस्तमम्। ज्ये॒ष्ठ॒राज॒ं ब्रह्म॑णां ब्रह्मणस्पत॒ आ न॑ः शृ॒ण्वन्नू॒तिभि॑ः सीद॒ साद॑नम्॥ गणेशं ध्यायामि। आवाहयामि।

जा॒तवे॑दसे सुनवाम॒ सोम॑मरातीय॒तो निद॑हाति॒ वेद॑ः। स न॑ः पर्॒षदति॑ दु॒र्गाणि॒ विश्वा॑ ना॒वेव॒ सिन्धु॑ं दुरि॒तात्य॒ग्निः॥ गौरीं ध्यायामि। आवाहयामि।

प्र णो॑ दे॒वी सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती। धी॒नाम॑वि॒त्र्य॑वतु॥ वाणीं ध्यायामि। आवाहयामि।

ब्रह्म॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द्वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विव॑ः॥ ब्रह्माणं ध्यायामि। आवाहयामि।

तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥ विष्णुं ध्यायामि। आवाहयामि।

सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्रः सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ रुद्रं ध्यायामि। आवाहयामि।

# नवग्रहदेवताः

अष्टकलसन्धिष्वीशानादिक्रमेण नवग्रहदेवताः – सूर्यं, अङ्गारकं, शुक्रं, सोमं, बुधं, बृहस्पतिं, शनिं, राहुं, केतुं च॥

आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेनाऽदेवो याति भुवना विपश्यन्॥ अग्निं दूतं वृणीमहे होतारं विश्ववेदसम्। अस्य यज्ञस्य सुक्रतुम्॥ येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम्। निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु॥ अधिदेवताप्रत्यधिदेवतासहितं सूर्यं ध्यायामि। आवाहयामि।

आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम्। भवा वाजस्य संगथे॥ अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा। अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः॥ गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी

स॒हस्रा॑क्षरा पर॒मे व्यो॑मन्॥ अधिदेवताप्रत्यधिदेवतासहितं सोमं ध्यायामि। आवाहयामि।

अ॒ग्निर्मू॒र्धा दि॒वः क॒कुत्पतिः॑ पृथि॒व्या अ॒यम्। अ॒पाꣳ रेता॑ꣳसि जिन्वति॥ स्यो॒ना पृ॑थिवि॒ भवा॑ नृक्ष॒रा नि॒वेश॑नी। यच्छा॑ नः॒ शर्म॑ स॒प्रथाः॑॥ क्षेत्र॑स्य॒ पति॑ना व॒यꣳ हि॒तेने॑व जयामसि। गामश्वं॑ पोषयि॒त्वा स नो॑ मृडातीदृ॒शे॑॥ अधिदेवताप्रत्यधिदेवतासहितं कुजं ध्यायामि। आवाहयामि।

उद् बु॑ध्यस्वाग्ने॒ प्रति॑ जागृह्येनमिष्टापू॒र्ते सꣳ सृ॑जेथाम॒यं च॑। पुनः॑ कृ॒ण्वꣳस्त्वा॑ पि॒तरं॒ युवा॑नम॒न्वाता॑ꣳ सी॒त्त्वयि॒ तन्तु॑मे॒तम्॥ इ॒दं विष्णु॒र्विच॑क्रमे त्रे॒धा नि द॑धे प॒दम्। समू॑ढमस्य पाꣳसु॒रे॥ विष्णो॑ र॒राट॑मसि॒ विष्णोः॑ पृ॒ष्ठम॑सि॒ विष्णोः॒ श्नप्त्रे॑ स्थो॒ विष्णो॒ः स्यूर॑सि॒ विष्णो॑र्ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा॥ अधिदेवताप्रत्यधिदेवतासहितं बुधं ध्यायामि। आवाहयामि।

बृह॑स्पते॒ अति॒ यद॒र्यो अर्हा॑द् द्यु॒मद् वि॒भाति॒ क्रतु॑म॒ज्जने॑षु। यद्दी॒दय॒च्छव॑सर्त प्रजात॒ तद॒स्मासु॒ द्रवि॑णं धेहि चि॒त्रम्॥ इन्द्र॑ मरुत्व इ॒ह पा॑हि॒ सोमं॒ यथा॑ शार्या॒ते अपि॑बः सु॒तस्य॑। तव॒ प्रणी॑ती॒ तव॑ शूर॒शर्म॒न्नावि॑वासन्ति क॒वयः॑ सुय॒ज्ञाः॥ ब्रह्म॑ यज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒द् वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ ष्ठाः स॒तश्च॒ योनि॒मस॑तश्च॒ विवः॑॥ अधिदेवताप्रत्यधिदेवतासहितं बृहस्पतिं ध्यायामि। आवाहयामि।

प्र वः॑ शु॒क्राय॑ भा॒नवे॑ भरध्वꣳ ह॒व्यं म॒तिं चा॒ग्नये॒ सुपू॑तम्। यो दैव्या॑नि॒ मानु॑षा ज॒नूꣳष्य॒न्तर्विश्वा॑नि वि॒द्मना॒ जिगा॑ति॥ इ॒न्द्रा॒णीमा॒सु नारि॑षु सु॒पत्नी॑म॒हम॑श्रवम्। न ह्य॑स्या अप॒रं च॒ न ज॒रसा॒ मर॑ते॒ पति॑ः॥ इन्द्रं॑ वो वि॒श्वत॒स्परि॒ हवा॑महे॒ जने॑भ्यः। अ॒स्माक॑मस्तु॒ केव॑लः॥ अधिदेवताप्रत्यधिदेवतासहितं शुक्रं ध्यायामि। आवाहयामि।

शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑। शं योर॒भिस्र॑वन्तु नः॥ प्रजा॑पते॒ नत्वदे॒तान्य॒न्यो विश्वा॑ जा॒तानि॒ परि॒ ता ब॑भूव। यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्॥ इ॒मं य॑म प्रस्त॒रमा हि सीदाङ्गि॑रोभिः पि॒तृभि॑ः संवि॒दा॒नः। आ त्वा॒ मन्त्रा॑ः कविश॒स्ता व॑हन्त्वे॒ना रा॑जन् ह॒विषा॑ मादयस्व॥ अधिदेवताप्रत्यधिदेवतासहितं शनैश्चरं ध्यायामि। आवाहयामि।

कया॑ नश्चि॒त्र आ भु॑वदू॒ती स॒दावृ॑धः॒ सखा॑। कया॒ शचि॑ष्ठया वृ॒ता॥ आयं गौः पृश्नि॑रक्रमी॒दस॑नन्मा॒तरं॒ पुन॑ः। पि॒तरं॑ च प्र॒यन्त्सुव॑ः॥ यत्ते॑ दे॒वी निर्ऋ॑तिराब॒बन्ध॒ दाम॑ ग्री॒वास्व॑विच॒र्त्यम्। इ॒दं ते॒ तद्विष्या॒म्यायु॑षो॒ न मध्या॒दथा॑ जी॒वः पि॒तुम॑द्धि॒ प्रमु॑क्तः॥ अधिदेवताप्रत्यधिदेवतासहितं राहुं ध्यायामि। आवाहयामि।

के॒तुं कृ॒ण्वन्न॑ के॒तवे॒ पेशो॑ मर्या अपे॒शसे॑। समु॒षद्भि॑रजायथाः॥ ब्र॒ह्मा दे॒वाना॑ं पद॒वीः क॑वी॒नामृषि॒र्विप्रा॑णां महि॒षो मृ॒गाणा॑म्। श्ये॒नो गृध्रा॑णा॒ꣳ स्वधि॑ति॒र्वना॑ना॒ꣳ सोम॑ः प॒वित्र॒मत्ये॑ति॒ रेभ॑न्॥ (ऋ०) स चि॑त्रचि॒त्रं चि॒तय॑न्तम॒स्मे चित्र॑क्षत्र चि॒त्रत॑मं वयो॒धाम्। च॒न्द्रं र॒यिं

पु॒रुवीरं॑ बृ॒हन्तं॒ चन्द्रं॑ च॒न्द्राभि॑र्गृ॒णते यु॑वस्व॥
अधिदेवताप्रत्यधिदेवतासहितं केतुं ध्यायामि। आवाहयामि।

# दिग्पालकदेवताः

इन्द्रादीन् आवाहयेत् – इन्द्रं, अग्निं, यमं, निर्ऋतिं, वरुणं, वायुं, सोमं, ईशानम्॥

त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्र॒ꣳ हवे॑हवे सु॒हव॒ꣳ शूर॒मिन्द्र॑म्। हु॒वे नु श॒क्रं पु॑रुहू॒तमिन्द्र॑ꣳ स्व॒स्ति नो॑ म॒घवा॑ धा॒त्विन्द्रः॑॥ इन्द्रं ध्यायामि। आवाहयामि।

त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान् दे॒वस्य॒ हेडोऽव॑ यासिसीष्ठाः। यजि॑ष्ठो॒ वह्नि॑तम॒ः शोशु॑चानो॒ विश्वा॒ द्वेषा॑ꣳसि॒ प्र मु॑मुग्ध्य॒स्मत्॥ अग्निं ध्यायामि। आवाहयामि।

सु॒गं न॒ः पन्था॒मभ॑यं कृणोतु। यस्मि॒न्नक्ष॑त्रे य॒म एति॒ राजा॑। यस्मि॑न्नेनम॒भ्यषि॑ञ्चन्त दे॒वाः। तद॑स्य चि॒त्रꣳ ह॒विषा॑ यजाम॥ यमं ध्यायामि। आवाहयामि।

असु॑न्वन्त॒मय॑जमानमिच्छस्ते॒नस्ये॒त्यां तस्क॑र॒स्यान्वे॑षि। अ॒न्यम॒स्मदि॑च्छ॒ सा त॑ इ॒त्या नमो॑ देवि निर्ऋते॒ तुभ्य॑मस्तु॥ निर्ऋतिं ध्यायामि। आवाहयामि।

तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा॑स्ते॒ यज॑मानो ह॒विर्भिः॑। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳस॒ मा न॒ आयुः॒ प्रमो॑षीः॥ वरुणं ध्यायामि। आवाहयामि।

आ नो॑ नि॒युद्भिः॑ श॒तिनी॑भिरध्व॒रम्। स॒ह॒स्रिणी॑भि॒रुप॑याहि य॒ज्ञम्। वायो॑ अ॒स्मिन् ह॒विषि॑ मादयस्व। यू॒यं पा॑तः स्व॒स्तिभि॒ः सदा॑ नः॥ वायुं ध्यायामि। आवाहयामि।

व॒यꣳ सो॑म व्र॒ते तव॑। मन॑स्त॒नूषु॒ बिभ्र॑तः। प्र॒जाव॑न्तो अशीमहि। इ॒न्द्रा॒णी दे॒वी सु॒भगा॑सु॒पत्नी॑॥ सोमं ध्यायामि। आवाहयामि।

(ऋ०) तमीशा॑न॒ं जग॑तः त॒स्थु॒षस्पति॑ं धियं जि॒न्वमव॑से हूमहे व॒यम्। पूषा नो॒ यथा॒ वेद॑सा॒मसद्वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्ध स्व॒स्तये॑॥ ईशानं ध्यायामि। आवाहयामि।

(ऋ०) अ॒स्मे रु॒द्रा मे॒हना॒ पर्व॑तासो वृ॒त्रह॑त्ये॒ भर॑हूतौ स॒जोषा॑ः। यः शंस॑ते स्तु॒वते धायि॑प॒ज्र इन्द्र॑ज्येष्ठा अ॒स्माँ अ॑वन्तु दे॒वाः॥ रुद्रं ध्यायामि। आवाहयामि।

स्यो॒ना पृ॑थि॒वि भवा॑ नृक्ष॒रा नि॒वेश॑नी। यच्छा॑ नः॒ शर्म॑ स॒प्रथा॑ः॥ पृथिवीं ध्यायामि। आवाहयामि।

# षट्कोणदेवताः

षट्कोणेषु पश्चिमादिचतुर्दिक्षु – गरुडं, भूमिं, कामं, लक्ष्मीम्॥

नमः पन्नगनद्धाय वैकुण्ठवशवर्तिने ।
श्रुतिसिन्धुसुधोत्पादमन्दराय गरुत्मने ॥
गरुडं ध्यायामि। आवाहयामि।

भूमि॑र्भू॒म्ना द्यौर्व॑रि॒णाऽन्तरि॑क्षं महि॒त्वा। उ॒पस्थे॑ ते देव्यदिते॒ऽग्निम॑न्ना॒दम॒न्नाद्या॒या द॑धे॥ भूमिं ध्यायामि। आवाहयामि।

क्लीं॥ कामं ध्यायामि। आवाहयामि।

हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्णर॑ज॒तस्र॑जाम्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह॥ लक्ष्मीं ध्यायामि। आवाहयामि।

# प्रधानकलशपूजा

कलशे प्रतिमां विन्यस्य अञ्जलौ पुष्पं गृहीत्वा ध्यायेत् –

ध्यायेत् सत्यं गुणातीतं गुणत्रयसमन्वितम् ।
लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ॥

नीलवर्णं पीतवासं श्रीवत्सपदभूषितम् ।
गोविन्दं गोकुलानन्दं ब्रह्माद्यैरपि पूजितम् ॥

( इति ध्यात्वा हृदिस्थं जीवं श्वासमार्गेण पुष्पाञ्जलावागतं विभाव्यावाहयेत )

स्वात्मसंस्थमजं शुद्धं त्वामद्य पुरुषोत्तम ।
अरण्यामिव हव्याशं मूर्तावावाहयाम्यहम् ॥

भूर्भुवः सुवरों सशक्तिसाङ्गसायुधसवाहनसपरिवार-
श्रीसत्यनारायणं आवाहयिष्ये॥ ॐ भूः सत्यनारायणं
आवाहयामि। ॐ भुवः०। ॐ सुवः०। ॐ भूर्भुवःसुवः
सत्यनारायणं आवाहयामि।

स॒हस्र॑शीर्षा॒ पुरु॑षः। स॒ह॒स्रा॒क्षः स॒हस्र॑पात्।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा। अत्य॑तिष्ठद् दशाङ्गु॒लम्॥

आगच्छ देव देवेश तेजोराशे जगत्पते ।
क्रियमाणामिमां पूजां गृहाण सुरसत्तम ॥
तत्पुष्पं समर्पयेत्। आवाह्य, प्राणाः प्रतिष्ठाप्य,

ॐ आं ह्रीं क्रों, क्रों ह्रीं आं, य र ल व श ष स हों
सत्यनारायणस्य प्राणा इह प्राणाः। जीव इह स्थितः।
सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं
चिरं तिष्ठन्तु स्वाहा॥ (इति मूर्तिहृदयं स्पृष्ट्वा त्रिः जपेत्)

असु॑नीते॒ पुन॑र॒स्मासु॒ चक्षुः॒ पुनः॑ प्रा॒णमि॒ह नो॑ धेहि॒ भोग॑म्।
ज्योक् प॑श्येम॒ सूर्य॑मु॒च्चर॑न्त॒मनु॑मते मृ॒ळया॑ नः स्व॒स्ति॥ पुन॑र्नो॒
असुं॑ पृथि॒वी द॑दातु॒ पुन॒र्द्यौर्दे॒वी पुन॑र॒न्तरि॑क्षम्। पुन॑र्न॒ः सोम॑स्त॒न्वं॑
ददातु॒ पुनः॑ पूषा प॒थ्यां॒३॒ या स्व॒स्तिः॥

पुरु॑ष ए॒वेद॒ꣳ सर्व॑म्। यद्भू॒तं यच्च॒ भव्य॑म्।
उ॒तामृ॑त॒त्वस्येशा॑नः। यदन्ने॑नाति॒रोह॑ति॥

नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।
आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यताम् ॥
आसनं समर्पयामि।

ए॒तावा॑नस्य महि॒मा। अतो॒ ज्याया॑ꣳश्च॒ पूरु॑षः।
पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑। त्रि॒पाद॑स्या॒मृतं॑ दि॒वि॥

गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम् ।
तोयमेतत् सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥
पाद्यं समर्पयामि।

त्रि॒पादू॒र्ध्व उदै॒त् पुरु॑षः। पादो॑ऽस्ये॒हाऽभ॑वा॒त् पुन॑ः।
ततो॒ विश्व॒ं व्य॑क्रामत्। सा॒श॒ना॒न॒श॒ने अ॒भि॥

गन्धपुष्पाक्षतोपेतं फलेन च समन्वितम् ।
हेमपात्रे स्थितं तोयं गृहाणार्घ्यं नमोऽस्तुते ॥
अर्घ्यं समर्पयामि।

तस्मा॑द् वि॒राड॑जायत। वि॒राजो॒ अधि॒ पूरु॑षः।
स जा॒तो अत्य॑रिच्यत। प॒श्चाद् भूमि॒मथो॑ पु॒रः॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ॥
आचमनं समर्पयामि।

दधि वारि घृतं चैव मधुखण्डविमिश्रितम् ।
तृप्त्यर्थं तव देवेश मधुपर्कं ददाम्यहम् ॥
पुनराचमनं समर्पयामि।

अभ्यङ्गार्थं जगत्पाल तैलं पुष्पादि संभवम् ।
सुगन्धद्रव्यसंमिश्रं संगृहाण सुरेश्वर ॥
तैलाभ्यङ्गं समर्पयामि।

अङ्गोद्वर्तनकं देव कस्तूर्यादिविमिश्रितम् ।
लेपनार्थं गृहाणेदं हरिद्राकुङ्कुमैर्युतम् ॥
अङ्गोद्वर्तनकं समर्पयामि।

नानातीर्थादाहृतं च तोयमुष्णं मया कृतम् ।
स्नानार्थं ते प्रयच्छामि स्वीकुरुष्व दयानिधे ॥
उष्णोदकस्नानं समर्पयामि।

आपो॒ हिष्ठा ० ज॒नय॑था च नः ॥
जाह्नवीजलमत्यन्तं पवित्रकरणं परम् ।
दत्तं मलापकर्षार्थं स्नानं कुरु जगत्पते ॥
मलापकर्षणस्नानं समर्पयामि।

## पञ्चामृतस्नानम्

क्षीरेण स्नापयिष्ये
कामधेनुसमुद्भूतं देवर्षिपितृतृप्तिदम् ।

पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

क्षीरस्नानं स्मर्पयामि। शुद्धोदकस्नानं समर्पयामि।

दध्ना स्नापयिष्ये

चन्द्रमण्डलसङ्काशं सर्वदेवप्रियं दधि ।

स्नानार्थं ते दया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥

दधिस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि।

घृतेन स्नापयिष्ये

आज्यं सुराणामाहार आज्यं यज्ञे प्रतिष्ठितम् ।

आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥

घृतस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि।

मधुना स्नापयिष्ये

सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु ।

स्नानार्थं ते प्रयच्छामि गृहाण त्वं सुरेश्वर ॥

मधुस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि।

शर्करया स्नापयिष्ये

इक्षुदण्डसमुद्भूतदिव्यशर्करया ह्यहम् ।

स्नापयामि महाभक्त्या प्रीतो भव सुरेश्वर ॥

शर्करास्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि।

# पञ्चोदकस्नानम्

० ० ०

# शुद्धोदकस्नानम्

अथ पञ्चोपचारपूजां करिष्ये –

लं पृथिव्यात्मने नमः गन्धं समर्पयामि ।
हं आकाशात्मने नमः पुष्पं समर्पयामि ।
यं वाय्वात्मने नमः धूपं समर्पयामि ।
रं तेजोमयात्मने नमः दीपं समर्पयामि ।
वं अमृतात्मने नमः नैवेद्यं समर्पयामि ।

अथ शुद्धोदकेन स्नापयिष्ये ।

यत् पुरुषेण हविषा। देवा यज्ञमतन्वत।
वसन्तो अस्यासीदाज्यम्। ग्रीष्म इध्मः शरद्धविः॥

सर्वतीर्थाहृतं तोयं मया प्रार्थनया विभो ।
सुवासितं गृहाणेदं सम्यक् स्नातुं सुरेश्वर ॥
शुद्धोदकस्नानं समर्पयामि।

पुरुषसूक्तेन श्रीसूक्तेन विष्णुसूक्तेन वा अतोदेवादिषण्मन्त्रैर्वा शङ्खेन महाभिषेकं कुर्यात् –

# ब्रह्मसूक्तम्

ब्रह्म॑ जज्ञा॒नं प्र॑थ॒मं पु॒रस्ता॒॑त्। वि सी॑म॒तः सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः। स॒तश्च॒ योनि॒मस॑तश्च॒ विवः॑॥ पि॒ता वि॒राजा॑मृष॒भो र॑यी॒णाम्। अ॒न्तरि॑क्षं वि॒श्वरू॑प॒ आवि॑वेश। तम॒र्कैर॒भ्य॑र्चन्ति व॒त्सम्। ब्रह्म॒सन्तं॒ ब्रह्म॑णा व॒र्धय॑न्तः॥ ब्रह्म॑ दे॒वान॑जनयत्। ब्रह्म॒ विश्व॑मि॒दं जग॑त्। ब्रह्म॑णः क्ष॒त्रं निर्मि॑तम्। ब्रह्म॑ ब्राह्म॒ण आ॒त्मना॑॥ अ॒न्तर॑स्मिन्नि॒मे लो॒काः। अ॒न्तर्विश्व॑मि॒दं जग॑त्। ब्रह्मै॒व भू॒ताना॒ं ज्येष्ठ॑म्। तेन॒ को॑ऽर्हति॒ स्पर्धि॑तुम्॥ ब्रह्म॑न् दे॒वास्त्रय॑स्त्रि॒ꣳशत्। ब्रह्म॑न्निन्द्रप्रजाप॒ती। ब्रह्म॑न् ह॒ विश्वा॑ भू॒तानि॑। ना॒वीवा॒न्तः स॒माहि॑ता॥ चत॑स्र॒ आशा॒ः प्रच॑रन्त्व॒ग्नय॑ः। इ॒मं नो॑ य॒ज्ञं न॑यतु प्रजा॒नन्। घृ॒तं पिन्व॑न्न॒जर॑ꣳ सु॒वीर॑म्। ब्रह्म॑ स॒मिद्भ॑व॒त्याहु॑तीनाम्॥

# विष्णुसूक्तम्

विष्णो॒र्नु कं॑ वी॒र्या॑णि॒ प्र वो॑च॒ं यः पार्थि॑वानि विम॒मे रजा॑ꣳसि॒ यो अस्क॑भाय॒दुत्त॑रꣳ स॒धस्थ॑ं विचक्रमा॒ण॒स्त्रे॒धोरु॑गा॒यः। (विष्णो॑र॒राट॑मसि॒ विष्णो॑ः पृ॒ष्ठम॑सि॒ विष्णो॒ः श्नप्त्रे॑ स्थो॒ विष्णो॒ः स्यूर॑सि॒ विष्णो॑र्ध्रु॒वम॑सि वैष्ण॒वम॑सि॒ विष्ण॑वे त्वा॥) तद॑स्य प्रि॒यम॒भि पाथो॑ अश्याम्। नरो॒ यत्र॑ देव॒यवो॒ मद॑न्ति। उ॒रु॒क्र॒मस्य॒ स हि बन्धु॑रि॒त्था। विष्णो॑ः प॒दे प॑र॒मे मध्व॒ उत्स॑ः॥ प्र तद्विष्णु॑ः स्तवते वी॒र्या॑य। मृ॒गो न भी॒मः कु॑च॒रो गि॑रि॒ष्ठाः। यस्यो॒रुषु॑ त्रि॒षु वि॒क्रम॑णेषु। अधि॑क्षि॒यन्ति॒ भुव॑नानि॒ विश्वा॑॥ प॒रो मात्र॑या त॒नुवा॑

वृधान। न ते॑ महि॒त्वमन्व॑श्नुवन्ति। उ॒भे ते॑ विद्म॒ रज॑सी पृथि॒व्या
विष्णो॑ देव॒ त्वम्। प॒र॒मस्य॑ वित्से॥ विच॑क्रमे पृथि॒वीमे॒ष ए॒ताम्।
क्षेत्रा॑य॒ विष्णु॒र्मनु॑षे दश॒स्यन्। ध्रु॒वासो॑ अस्य की॒रयो॒ जना॑सः।
उ॒रु॒क्षि॒तिꣳ सु॒जनि॑मा चकार॥ त्रिर्दे॒वः पृ॑थि॒वीमे॒ष ए॒ताम्।
विच॑क्रमे श॒तर्च॑सं महि॒त्वा। प्र विष्णु॑रस्तु त॒वस॒स्तवी॑यान् त्वे॒षꣳ
ह्य॑स्य॒ स्थवि॑रस्य॒ नाम॑॥

# रुद्रसूक्तम्

परि॑णो रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु॒ परि॑ त्वे॒षस्य॑ दु॒र्म॒तिर॑घा॒योः। अव॑स्थि॒रा
म॒घव॑द्भ्यस्तनुष्व॒ मीढ्व॑स्तो॒काय॒ तन॑याय मृडय॥ स्तु॒हि श्रु॒तं ग॑र्त॒सदं॒
युवा॑नं मृ॒गं न भी॒ममु॑पह॒त्नुमु॒ग्रम्। मृ॒डा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो
अ॒न्यन्ते॑ अ॒स्मन्निव॑पन्तु॒ सेनाः॑॥ मीढु॑ष्टम॒ शिव॑तम शि॒वो नः॑
सु॒मना॑ भव। प॒र॒मे वृ॒क्ष आयु॑धं नि॒धाय॒ कृत्तिं॒ वसा॑न॒ आच॑र॒
पिना॑कं॒ बिभ्र॒दाग॑हि॥ अर्ह॑न् बिभर्षि॒ साय॑कानि॒ धन्व॑। अर्ह॑न्नि॒ष्कं
य॑ज॒तं वि॒श्वरू॑पम्। अर्ह॑न्नि॒दं द॑यसे॒ विश्व॒मब्भु॑वम्। न वा ओजी॑यो
रुद्र॒ त्वद॑स्ति॥ त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्वꣳ शर्धो॒ मारु॑तं
पृ॒क्ष ई॑शिषे। त्वं वातै॑ररु॒णैर्या॑सि शङ्ग॒यस्त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु
त्मना॑। आ वो॒ राजा॑नमध्व॒रस्य॑ रु॒द्रꣳ होता॑रꣳ सत्य॒यज॒ꣳ
रोद॑स्योः। अ॒ग्निं पु॒रात॑नयि॒त्नोर॒चित्ता॒द्धिर॑ण्यरूप॒मव॑से कृणुध्वम्॥

# पुरुषसूक्तम्

स॒हस्र॑शीर्षा॒ पुरु॑षः। स॒ह॒स्रा॒क्षः स॒हस्र॑पात्। स भूमिं॑ वि॒श्वतो॑
वृत्वा। अत्य॑तिष्ठद् दशाङ्गु॑लम्॥ पुरु॑ष ए॒वेदꣳ सर्व᳚म्। यद्भू॒तं यच्च॒
भव्य᳚म्। उ॒तामृ॑त॒त्वस्येशा॑नः। यदन्ने॑नाति॒रोह॑ति॥ ए॒तावा॑नस्य
महि॒मा। अतो॒ ज्यायाꣳ॑श्च॒ पूरु॑षः॥

पादो᳚ऽस्य॒ विश्वा॑ भू॒तानि॑। त्रि॒पाद॑स्या॒मृतं॑ दि॒वि॥ त्रि॒पादू॒र्ध्व उदै॒त्
पुरु॑षः। पादो᳚ऽस्ये॒हाऽभ॑वा॒त् पुन॑ः। ततो॒ विश्वं॒ व्य॑क्रामत्।
सा॒श॒ना॒न॒श॒ने अ॒भि॥ तस्मा᳚द् वि॒राड॑जायत। वि॒राजो॒ अधि॒
पूरु॑षः। स जा॒तो अत्य॑रिच्यत। प॒श्चाद् भूमि॒मथो॑ पु॒रः॥

यत् पुरु॑षेण ह॒विषा᳚। दे॒वा य॒ज्ञमत॑न्वत। व॒स॒न्तो अ॑स्यासी॒दाज्य᳚म्।
ग्री॒ष्म इ॒ध्मः श॒रद्ध॒विः॥ स॒प्तास्या॑ऽसन् परि॒धय॑ः। त्रिः स॒प्त
स॒मिध॑ः कृ॒ताः। दे॒वा यद् य॒ज्ञं त॑न्वा॒नाः। अब॑ध्न॒न् पुरु॑षं प॒शुम्॥
तं य॒ज्ञं ब॒र्हिषि॒ प्रौक्ष॑न्। पुरु॑षं जा॒तम॑ग्र॒तः॥

तेन॑ दे॒वा अय॑जन्त। सा॒ध्या ऋष॑यश्च॒ ये॥ तस्मा᳚द् य॒ज्ञात्
स॑र्व॒हुत॑ः। संभृ॑तं पृषदा॒ज्यम्। प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्यान्॑।
आ॒र॒ण्यान् ग्रा॒म्याश्च॒ ये॥ तस्मा᳚द् य॒ज्ञात् स॑र्व॒हुत॑ः। ऋच॒ः सामा॑नि
जज्ञिरे। छन्दाꣳ॑सि जज्ञिरे॒ तस्मा᳚त्। यजु॒स्तस्मा॑दजायत॥

तस्मा॒दश्वा॑ अजायन्त। ये के चो॑भ॒याद॑तः। गावो॑ ह जज्ञिरे॒
तस्मा᳚त्। तस्मा᳚ज्जा॒ता अ॑जा॒वय॑ः॥ यत् पुरु॑षं॒ व्य॑दधुः। क॒ति॒धा

व्यंकल्पयन्। मुखं किमंस्य कौ बाहू। कावूरू पादांवुच्येते॥
ब्राह्मणोँऽस्य मुखंमासीत्। बाहू रांजन्यंः कृतः॥

ऊरू तदंस्य यद् वैश्यंः। पद्भ्याꣳ शूद्रो अंजायत॥ चन्द्रमा मनंसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रंश्चाग्निश्चं। प्राणाद् वायुरंजायत॥ नाभ्यां आसीदन्तरिंक्षम्। शीर्ष्णो द्यौः समंवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्राँत्। तथां लोकाꣳ अंकल्पयन्॥

वेदाहमेतं पुरुंषं महान्तँम्। आदित्यवंर्णं तमंसस्तु पारे। सर्वाणि रूपाणिं विचित्य धीरंः। नामांनि कृत्वाऽभिवदन् यदास्तेँ॥ धाता पुरस्ताद् यमुंदाजहारं। शक्रः प्रविद्वान् प्रदिशश्चतंस्रः। तमेवं विद्वानमृतं इह भंवति। नान्यः पन्था अयंनाय विद्यते। यज्ञेनं यज्ञमंयजन्त देवाः। तानि धर्माणि प्रथमान्यांसन्। ते ह नाकं महिमानंः सचन्ते। यत्र पूर्वे साध्याः सन्तिं देवाः॥

## उत्तरनारायणम्

अद्भ्यः संभूंतः पृथिव्यै रसाँच्च। विश्वकंर्मणः समंवर्ततार्धिं। तस्य त्वष्टां विदधंद् रूपमेंति। तत् पुरुंषस्य विश्वमांजानमग्रेँ। वेदाहमेतं पुरुंषं महान्तँम्। आदित्यवंर्णं तमंसः परंस्तात्। तमेवं विद्वानमृतं इह भंवति। नान्यः पन्थां विद्यतेऽयंनाय॥ प्रजापंतिश्चरति गर्भे अन्तः। अजायंमानो बहुधा विजायते॥

तस्य धीराः परिंजानन्ति योनिँम्। मरींचीनां पदमिंच्छन्ति वेधसंः॥ यो देवेभ्य आतंपति। यो देवानां पुरोहिंतः। पूर्वो यो

देवेभ्यो जातः। नमो रुचाय ब्राह्मये॥ रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राँह्मणो विद्यात्। तस्य देवा असन् वशेँ॥ ह्रीश्च ते लक्ष्मीश्च पत्न्यौँ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौऽव्यात्तँम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥

# नारायणसूक्तम्

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम्। विश्वं नारायणं देवमक्षरं परमं पदम्। विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिम्। विश्वमेवेदं पुरुषस्तद् विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम्। नारायणं महाज्ञेयं विश्वात्मानं परायणम्। नारायण परो ज्योतिरात्मा नारायणः परः। नारायण परं ब्रह्मतत्त्वं नारायणः परः। नारायण परो ध्याता ध्यानं नारायणः परः। यच्च किञ्चिज्जगत् सर्वं दृश्यतेँ श्रूयतेऽपि वा॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः। अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशंभुवम्। पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम्। अधो निष्ट्या वितस्यान्ते नाभ्यामुपरि तिष्ठति। ज्वालमालाकुलं भाति विश्वस्याऽयतनं महत्। सन्ततꣳ शिलाभिस्तु लम्बत्याकोशसंनिभम्। तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिँन् सर्वं प्रतिष्ठितम्। तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोऽग्रभुग्विभजन् तिष्ठन्नाहारमजरः कविः। तिर्यगूर्ध्वमधःशायी रश्मयस्तस्य सन्तता। संतापयति स्वं देहमापादतलमस्तकः। तस्य मध्ये

व॒ह्निशि॑खा अ॒णीयो॑र्ध्वा व्य॒वस्थि॑तः। नी॒लतो॑यदं॑मध्य॒स्था॒द्
वि॒द्युल्ले॑खेव॒ भास्व॑रा। नी॒वा॒र॒शूक॑वत् त॒न्वी॒ पी॒ता भा॑स्वत्य॒णूप॑मा।
तस्याः॑ शिखा॒या मं॑ध्ये प॒रमा॑त्मा व्य॒वस्थि॑तः। स ब्रह्म॒ स शिव॒ः
स हरि॒ः सेन्द्र॒ः सोऽक्ष॑रः पर॒मः स्व॒राट्॥

# श्रीसूक्तम्

हिर॑ण्यवर्णा॒ं हरि॑णीं सुव॒र्णर॑ज॒तस्र॑जाम्। च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं
जात॑वेदो म॒ आव॑ह। तां म॒ आव॑ह जातवेदो
ल॒क्ष्मीमन॑पगा॒मिनी॑म्। यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम्।
अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना॑दप्रबोधि॑नीम्। श्रियं॑ दे॒वीमुप॑ह्वये॒
श्रीर्मा॑दे॒वीर्जु॑षताम्। कां॒सो॒ऽस्मि॒तां हिर॑ण्यप्रा॒कारा॑मा॒र्द्रां ज्वल॑न्तीं
तृ॒प्तां त॒र्पय॑न्तीम्। प॒द्मे॒स्थि॒तां प॒द्मव॑र्णां ता॒मि॒होप॑ह्वये॒ श्रिय॑म्। च॒न्द्रां
प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रियं॑ लो॒के दे॒वजु॑ष्टामुदा॒राम्। तां
प॒द्मिनी॑मीं॒ शर॑णमहं प्रप॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां वृ॑णे।
आ॒दि॒त्यव॑र्णे॒ तप॒सोऽधि॑जा॒तो वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ बि॒ल्वः।
तस्य॒ फला॑नि॒ तप॒सानु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः।
उपै॑तु॒मां दे॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह। प्रा॒दु॒र्भू॒तोऽस्मि॑
रा॒ष्ट्रेऽस्मिन् की॒र्तिमृ॑द्धिं द॒दातु॑ मे। क्षुत्पि॑पा॒साम॑लां ज्ये॒ष्ठामल॒क्ष्मीं
ना॑शया॒म्यहम्। अभू॑ति॒मस॑मृद्धिं॒ च सर्वा॒न्निर्णु॑दमे॒ गृहात्। गन्ध॑द्वा॒रां
दु॑राध॒र्षां नि॒त्यपु॑ष्टां करी॒षिणी॑म्। ई॒श्वरीं॑ सर्व॑भूताना॒ं ता॒मि॒होप॑ह्वये॒
श्रिय॑म्। मन॑स॒ः काम॒माकू॑तिं वा॒चः स॒त्यम॑शीमहि। प॒शू॒नां
रू॒पम॑न्न॒स्य मयि॒ श्रीः श्र॑यतां॒ यशः। कर्द॑मे॒न प्र॑जाभू॒ता म॒यि

संभवकर्द म। श्रियं वासयं मे कुले मातरं पद्ममालिंनीम्। आपंः सृजन्तुं स्निग्धानि चिक्लीतवंसमे गृहे। निचंदेवीं मातरं श्रियं वासयं मे कुले। आर्द्रां पुष्करिंणीं पुष्टिं सुवर्णां हेममालिंनीम्। सूर्यां हिरण्मंयीं लक्ष्मीं जातंवेदो म आवंह। आर्द्रां यः करिंणीं यष्टिं पिङ्गलां पद्ममालिंनीम्। चन्द्रां हिरण्मंयीं लक्ष्मीं जातंवेदो म आवंह। तां म आवंह जातंवेदो लक्ष्मीमनंपगामिनींम्। यस्यां हिरंण्यं प्रभूंतं गावों दास्योऽश्वाँन् विन्देयं पुरुंषानहम्॥

## महाभिषेकः

सप्तास्यांऽसन् परिधयंः। त्रिः सप्त समिधंः कृताः।
देवा यद् यज्ञं तंन्वानाः। अबंध्नन् पुरुंषं पशुम्॥

सूक्तमन्त्रेण गन्धेन तुलस्या च समन्वितम् ।
महाभिषेकं शङ्खेन करोमि तव तुष्टये ॥
महाभिषेकस्नानं समर्पयामि। स्नानानन्तरं आचमनं समर्पयामि।

ध्रुवं ते राजा ॰ ध्रुवंम् ॥
सुप्रतिष्ठितमस्तु।

## वस्त्रसमर्पणादि

तं यज्ञं बर्हिषि प्रौक्षंन्। पुरुंषं जातमंग्रतः।
तेनं देवा अयंजन्त। साध्या ऋषंयश्च ये॥

तप्तकाञ्चनवर्णाभं पट्टोर्णं म्ऋदुलं शुभम् ।
वस्त्रयुग्मं मया दत्तं गृहाण जगदीश्वर ॥
वस्त्रयुग्मं समर्पयामि। आचमनं समर्पयामि।

तस्मा॑द् य॒ज्ञात् स॑र्व॒हुत॑ः। संभृ॑तं पृषदा॒ज्यम्।
प॒शूꣳस्ताꣳश्च॑क्रे वाय॒व्यान्॑। आ॒र॒ण्यान् ग्रा॒म्याश्च॒ ये॥

ब्रह्मविष्णुमहेशैश्च निर्मितं ब्रह्मसूत्रकम् ।
यज्ञोपवीतं तद्दानात् प्रीयतं कमलापतिः ॥
यज्ञोपवीतं समर्पयामि। आचमनं समर्पयामि।

कटिसूत्राङ्गुलीये च कुण्डलं मुकुटं तथा ।
केयूरं कौस्तुभं हारं गृहाण पुरुषोत्तम ॥
अलङ्कारान् समर्पयामि।

तस्मा॑द् य॒ज्ञात् स॑र्व॒हुत॑ः। ऋच॒ः सामा॑नि जज्ञिरे।
छन्दा॑ꣳसि जज्ञिरे॒ तस्मा॑त्। यजु॒स्तस्मा॑दजायत॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥
गन्धं समर्पयामि।

# सौभाग्यद्रव्यार्पणम्

मुक्तामणिगणाकीर्णं नानावर्णविचित्रितम् ।
दिव्यं परमशोभाढ्यं कञ्चुकं देवि धार्यताम् ॥
श्रीलक्ष्म्यै नमः कञ्चुकं समर्पयामि।

नासिकाभरणं दिव्यं काञ्चनेन समन्वितम् ।
नासामुक्तं मया दत्तं गृहाण त्वं सुभोभने ॥
श्रीलक्ष्म्यै नमः। नासामुक्तं समर्पयामि।

ताडपत्रं मया देवि हेमनिर्मितमुत्तमम् ।
कर्णयोर्भूषणं दत्तं गृहाण जगदम्बिके ॥
श्रीलक्ष्म्यै नमः। ताडपत्रं समर्पयामि।

काचेन निर्मितं दिव्यं कङ्कणं च सुरेश्वरि ।
हस्तालङ्करणार्थाय गृहाण जगदम्बिके ॥
श्रीलक्ष्म्यै नमः। कङ्कणं समर्पयामि।

माङ्गल्यतन्तुमणिभिर्युक्तं मुक्ताविराजितम् ।
कण्ठसूत्रं मया दत्तं गृहाण जगदम्बिके ॥
श्रीलक्ष्म्यै नमः। कण्ठसूत्रं समर्पयामि।

कृष्णैश्च काचमणिभिः स्यूतं ग्रैवेयकं तथा ।
दास्यामि कण्ठमालार्थं प्रत्यङ्गे कमले तव ॥
श्रीलक्ष्म्यै नमः। कण्ठमालां समर्पयामि।

हरिद्रां मङ्गले कार्ये गृहीतां मुनिदैवतैः ।
मातर्गृहाण सुस्निग्धां मुखचन्द्रानुरञ्जिनीम् ॥
श्रीलक्ष्म्यै नमः। हरिद्रां समर्पयामि।

कुङ्कुमं सर्वसौभाग्यसूचकं भालभूषणम् ।
स्वीकुरुष्व जगन्मातर्जपाकुसुमसन्निभम् ॥
श्रीलक्ष्म्यै नमः। कुङ्कुमं समर्पयामि।

कज्जलं नवनीताढ्यं शुद्धकर्पूरमिश्रितम् ।
गृहाण नेत्रभूषार्थं दत्तं स्वर्णशलाकया ॥
श्रीलक्ष्म्यै नमः। कज्जलं समर्पयामि।

सिन्दूरं नागसंभूतं स्त्रीणां सीमन्तभूषणम् ।
मातर्ददामि ते प्रीत्यै गृहाण जगदम्बिके ॥
श्रीलक्ष्म्यै नमः। सिन्दूरं समर्पयामि॥

# अक्षतसमर्पणादि

ज्योत्स्नापते नमस्तुभ्यं नमस्ते विश्वरूपिणे ।
नानापरिमलद्रव्यं गृहाण पुरुषोत्तम ॥
नानापरिमलद्रव्यं समर्पयामि।

श्वेततण्डुलसंयुक्तान् कुङ्कुमेन विराजितान् ।
अक्षतान् गृह्यतां देव नारायण नमोऽस्तु ते ॥
अक्षतान् समर्पयामि।

तस्मा॒दश्वा॑ अजायन्त। ये के चो॑भ॒याद॑तः।
गावो॑ ह जज्ञिरे॒ तस्मा॑त्। तस्मा॑ज्ज्ञा॒ता अ॑जा॒वयः॑॥

मल्लिकादिसुगन्धीनि मालत्यादीनि वै प्रभो ।
मया हृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥
पुष्पाणि समर्पयामि।

तुलसीकुन्दमन्दारपारिजाताम्बुजैः कृताम् ।
वैजयन्तीमिमां मालां तव कण्ठेऽर्पयाम्यहम् ॥
वैजयन्तीमालां समर्पयामि।

वनमालां सुगन्धाढ्यां नानापुष्पैः समन्विताम् ।
पूजार्थे साधितां देव प्रीत्यर्थं प्रतिगृह्यताम् ॥
वनमालां समर्पयामि।

# पत्रपुष्पाङ्गपूजाः

श्रीकृष्णाय नमः। पलाशपत्रं समर्पयामि॥ विष्णवे° औदुम्बर°॥
हरये° अश्वत्थ°॥ शम्भवे° भृङ्गराज°॥ ब्रह्मणे° शमी°॥ शेषाय°
कपित्थ°॥ भास्कराय° अशोक°॥ सर्वव्यापिने° वट°॥
सृष्टिकर्त्रे° करवीर°॥ स्थितिकर्त्रे° पुन्नाग°॥ ईश्वराय° आम्र°॥
अच्युताय नमः। तुलसीपत्रं समर्पयामि॥

ॐ अनन्ताय नमः। पद्मपुष्पं समर्पयामि॥ विष्णवे° जाती°॥
अव्यक्ताय° कह्लार°॥ केशवाय° चम्पक°॥ सहस्रजिते°

केसरी०॥ इष्टाय० बकुल०॥ विशिष्टाय० पुन्नाग०॥ शिष्टेष्टाय० करवीर०॥ शिखण्डिने० धत्तूर०॥ नहुषाय० नन्द्यावर्त०॥ महीधराय० मालती०॥ विश्वबाहवे नमः। मल्लिकापुष्पं समर्पयामि॥

ॐ सत्यनारायणाय नमः। पादौ पूजयामि॥ सङ्कर्षणाय० गुल्फौ०॥ कालात्मने० जङ्घे०॥ विश्वरूपिणे० जानुनी०॥ कृष्णाय० ऊरू०॥ प्रद्युम्नाय० गुह्यं०॥ विश्वाय० कटिं०॥ पद्मनाभाय० नाभिं०॥ दामोदराय० उदरं०॥ परमात्मने० हृदयं०॥ मुकुन्दाय० स्तनौ०॥ कम्बुग्रीवाय० कण्ठं०॥ सर्वव्यापिनि० स्कन्धौ०॥ चतुर्बाहवे० बाहून्०॥ सर्वास्त्रधारिणे० हस्तान्०॥ वाचस्पतये० मुखं०॥ हरये० जिह्वां०॥ दानवारये० दन्तान्०॥ पुरुषोत्तमाय० नासिकां०॥ अच्युताय नमः० कर्णौ०॥ सहस्राक्षाय० नेत्रे०॥ लोकरक्षकाय० भ्रुवौ०॥ केशवाय० ललाटं०॥ सर्वात्मने० शिरः०॥ श्रीसत्यनारायणाय नमः। सर्वाङ्गं पूजयामि॥

# आवरणपूजा

षट्कोणमध्ये – श्रीसत्यनारायणाय नमः॥ पुरतः पश्चिमे, गरुडाय नमः॥ तदुत्तरे, भूम्यै नमः॥ तत्पूर्वे कामाय नमः॥ तद्दक्षिणे लक्ष्म्यै नमः॥

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥
अनेन प्रथमावरणार्चनेन श्रीसत्यनारायणः प्रीयताम्।

षट्कोणे पूर्वादिक्रमेण – गणेशाय नमः। गौर्यै नमः। वाण्यै नमः।
ब्रह्मणे नमः। विष्णवे नमः। रुद्राय नमः॥

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥
अनेन द्वितीयावरणार्चनेन श्रीसत्यनारायणः प्रीयताम्।

अष्टदलसन्धिषु ईशानादिक्रमेण – सूर्याय नमः। चन्द्राय नमः।
कुजाय नमः। बुधाय नमः। गुरवे नमः। शुक्राय नमः।
शनैश्चराय नमः। राहवे नमः। केतवे नमः॥

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥
अनेन तृतीयावरणार्चनेन श्रीसत्यनारायणः प्रीयताम्।

अष्टदलेषु पूर्वादिक्रमेण – इन्द्राय नमः। अग्नये नमः। यमाय नमः। निर्ऋतये नमः। वरुणाय नमः। वायवे नमः। सोमाय नमः। ईशानाय नमः॥

दयाब्धे त्राहि संसार्सर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥
अनेन चतुर्थावरणार्चनेन श्रीसत्यनारायणः प्रीयताम्।

दलाग्रेषु पूर्वादिक्रमेण – वज्राय नमः। शक्तये नमः। दण्डाय नमः। खड्गाय नमः। पाशाय नमः। अङ्कुशाय नमः। गदायै नमः। शूलाय नमः॥

दयाब्धे त्राहि संसार्सर्पान्मां शरणागतम् ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥
अनेन पञ्चमावरणार्चनेन श्रीसत्यनारायणः प्रीयताम्।

# द्वादशनामपूजा

द्वादशनामपूजा – ॐ केशवाय नमः। नारायनाय॰। माधवाय॰। गोविन्दाय॰। विष्णवे॰। मधुसूदनाय॰। त्रिविक्रमाय॰। वामनाय॰। श्रीधराय॰। हृषीकेशाय॰। पद्मनाभाय॰। दामोदराय नमः॥

अथ तुलसीपत्रपूजा – सङ्कर्षणाय नमः। वासुदेवाय॰। प्रद्युम्नाय॰। अनिरुद्धाय॰। पुरुषोत्तमाय॰। अधोक्षजाय॰। नारसिंहाय॰। अच्युताय॰। जनार्दनाय॰। अपेन्द्राय॰। हरये॰। श्रीकृष्णाय नमः॥

# अष्टोत्तरशतनामपूजा

अस्य श्रीनारायणाष्टोत्तरशतनामस्तोत्रमन्त्रस्य – श्रीवेदव्यास ऋषिः। अनुष्टुप् छन्दः। श्रीनारायणो देवता। अं बीजम्। उं शक्तिः। मं कीलकम्। श्रीसत्यनारायणप्रीत्यर्थे अष्टोत्तरशतनामपूजने विनियोगः॥

(प्रतिनाम तुसलीदलैर्बिल्वपत्रैर्विविधैः पुष्पैः सुकुङ्कुमाक्षतैर्वा पूजयेत्)

# शतनामोत्तरपूजा

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥
सकलाराधनैः स्वर्चितमस्तु।

यत् पुरु॑षं॒ व्य॑दधुः। क॒ति॒धा व्य॑कल्पयन्।
मुखं॒ किम॑स्य॒ कौ बा॒हू। कावू॒रू पादा॑वुच्येते॥

वनस्पतिरसोत्पन्नो गन्धाढ्यो धूप उत्तमः ।
आघ्रेयः सर्वभूतानां धूपोऽयं प्रतिगृह्यताम् ॥
धूपं समर्पयामि।

ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीत्। बा॒हू रा॑ज॒न्यः॑ कृ॒तः।
ऊ॒रू तद॑स्य॒ यद् वैश्यः॑। प॒द्भ्याꣳ शू॒द्रो अ॑जायत॥

साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥
दीपं समर्पयामि।

(देवस्य पुरतश्चतुरश्रमण्डले सपादभक्ष्यनैवेद्यं निधाय गायत्र्या प्रोक्ष्य)

च॒न्द्रमा॒ मन॑सो जा॒तः। चक्षो॒ः सूर्यो॑ अजायत।
मु॒खा॒दिन्द्र॑श्चा॒ग्निश्च॑। प्रा॒णाद् वा॒युर॑जायत॥

घृतगोधूमकक्षीररम्भाफासितान्वितम् ।
सपादभक्ष्यं नैवेद्यमुत्तमं प्रतिगृह्यताम् ॥
नैवेद्यार्थे सपादभक्ष्यनैवेद्यं समर्पयामि।

अ॒मृ॒तो॒प॒स्तर॑णमसि। ०००

उत्तरापोशनं समर्पयामि। हस्तप्रक्षालनं समर्पयामि। मुखप्रक्षालनं समर्पयामि। करोद्वर्तनार्थे चन्दनं समर्पयामि। शुद्धाचमनं समर्पयामि।

नालिकेरं मातुलिङ्गं जम्बूकर्कटिदाडिमम् ।
कूष्माण्डं बदरं रम्भाफलं च प्रतिगृह्यताम् ॥

इदं फलं मया देव स्थापितं पुरतस्तव ।
तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥
फलाष्टकं समर्पयामि।

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
कर्पूरैलादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ताम्बूलं समर्पयामि।

न्यूनातिरिक्तपूजायाः संपूर्णफलहेतवे ।
दक्षिणां काञ्चनीं देव स्थापयामि तवाग्रतः ॥
पूजासंपूर्णार्थे सुवर्णपुषदक्षिणां समर्पयामि।

वि॒श्वत॑श्चक्षुरु॒त वि॒श्वतो॑मुखो वि॒श्वतो॑हस्त उ॒त वि॒श्वत॑स्पात्।
संबा॒हुभ्यां॒ नम॑ति॒ संपत॑त्रै॒र्द्यावा॑पृथि॒वी ज॒नयं॑न्दे॒व एकः॑॥

त्वद्भासा भासितो लोकः कोटिसूर्यसमप्रभ ।
नीराजयिष्ये त्वां विष्णो कृपां कुरु मम प्रभो ॥
नीराजनं समर्पयामि।

नीराजनं सुमङ्गल्यं कर्पूरोद्भासितं विभो ।
चन्द्रार्कवह्निसदृशं देवेश प्रतिगृह्यताम् ॥
कर्पूरनीराजनं समर्पयामि।

गृहाण पादुके दिव्ये सरत्ने छत्रचामरे ।
दर्पणं व्यजनं दोलां राजभोगाय कल्पितम् ॥
राजोपचारान् समर्पयामि।

नाभ्या॑ आसीद॒न्तरि॑क्षम्। शी॒र्ष्णो द्यौः सम॑वर्तत।
प॒द्भ्यां भूमि॒र्दिश॒ः श्रोत्रा॓त्। तथा॑ लो॒काꣳ अ॑कल्पयन्॥

मया कायेन मनसा वाचा जन्मशतार्जितम् ।
पापं प्रशमय श्रीश प्रदक्षिण पदे पदे ॥
प्रदक्षिणां समर्पयामि।

स॒प्तास्यां॑ऽसन् परि॒धयः॑। त्रिः स॒प्त स॒मिधः॑ कृ॒ताः।
दे॒वा यद् य॒ज्ञं त॑न्वा॒नाः। अब॑ध्न॒न् पुरु॑षं प॒शुम्॥

नमः सर्वहितार्थाय जगदाधारहेतवे ।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः ॥
नमस्कारान् समर्पयामि।

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः। तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।
ते ह॒ नाकं॑ महि॒मानः॑ सचन्ते। यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः॥

मन्त्रपुष्पाञ्जलिं पूजान्यूनत्वाधिक्यपूरणम् ।
ददामि देवदेवेश मन्त्रोच्चारणपूर्वकम् ॥
मन्त्रपुष्पाञ्जलिं समर्पयामि।

# प्रार्थना

यन्मया भक्तियुक्तेन पत्रं पुष्पं फलं जलम् ।
निवेदितं च नैवेद्यं तद्गृहाणानुकम्पया ॥

अमोघं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।
हृषीकेशं जगन्नाथं वागीशं वरदायकम् ॥

गुणत्रयं गुणातीतं गोविन्दं गरुडध्वयम् ।
जनार्दनं जनातीतं जानकीवल्लभं हरिम् ॥

प्रणमामि सदा भक्त्या नारायणमतः परम् ।
दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते ॥

निस्तारयस्व सर्वेषु तथानिष्टभयेषु च ।
नामान्येतानि संकीर्त्य फलमीप्सितमाप्नुयात् ॥

सत्यनारायणं देवं वन्देऽहं कामदं प्रभुम् ।
लीलया विततं विश्वं येन तस्मै नमो नमः ॥

गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ।
आगता सुखसंपत्तिः पुण्याच्च तव दर्शनात् ॥

पूजितस्त्वं यथाशक्त्या नमस्तेऽस्तु सुरोत्तम ।
ऐहिकामुष्मिकीं देव कार्यसिद्धिं दिशस्व मे ॥
प्रार्थनां समर्पयामि।

यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

अनेन मयाकृतेन पूजाराधनेन श्रीसत्यनारायणः प्रीयताम्।
पूजामध्ये स्वरवर्णमन्त्रतन्त्रलोपप्रायश्चित्तार्थं नामत्रयजपमहं करिष्ये॥ अच्युताय नमः। अनन्ताय नमः। गोविन्दाय नमः॥

# कथानुवादः (१)

( Translated by Narasimha Rao )

In the forest of Naimisha, Sages Shounaka etc assembled around Sage Soota, disciple of Sage Vyasa, and asked him, "in the age of Kali, is there a solution to the strife faced by human beings on earth?" Sage Soota told them, "O great sages, you have asked a very good question for the benefit of the world. The same question was posed by Sage Narada to Lord Vishnu himself long back and I will repeat to you what Lord Vishnu told Sage Narada."

Then Sage Soota proceeded to recount to them the ritual of Lord Satya Narayana, as taught by Lord Vishnu to Sage Narada.

This ritual can be performed on any Ekadashi day or Full Moon day or a Sankranthi (monthly solar ingress) day or just any auspicious day. One should get up in the morning and take vow in the mind to do the ritual that evening. In the evening, one should take bath and do the ritual.

First one should pray to Lord Ganesha (personification of an aspect of consciousness that makes us avoid and overcome obstacles). Then one should pray to Lord Varuna (personification of an aspect of consciousness that makes us persist and persevere in our work) in a kalasha (pot). Then one should pray to Loka palakas (rulers of the elements composing this world), nine planets along with

ruling and co-ruling deities and the rulers of ten directions. Then one should invite Lord Satya Narayana, along with his consort Ramaa (Lakshmi), and pray to him. This ritual can be performed by people of any varna.

# कथानुवादः (२)

Then the sages asked Sage Soota to tell the stories of some people who performed this ritual in the past and benefited. Sage Soota told them this story.

An old brahmana in the city of Kashi was suffering from poverty despite being very wise and learned. Oneday, Lord appeared in front of in the disguise of another brahmana and taught him how to perform the ritual of Lord Satya Narayana and left. The old brahmana decided to do the ritual on the next day. He fasted that day and used the money he got by begging that day to buy materials for the pooja instead of his food. He performed the ritual within his means and the Lord was pleased. He lived happily ever after and reached Satya Loka (the realm of Truth, which is the abode of Lord Satya Narayana) at the end of his life.

Then the sages asked Sage Soota for some more stories. The sage told another story.

A peasant who lived by cutting wood and selling it saw this brahmana doing the ritual. He found out the details from the brahmana and decided to do the ritual on the next day. He went to a street having many rich people next day and got double the money he would've got for that wood on other days. He bought materials with the profits and did the ritual to the best of his ability.

The Lord was pleased. He lived happily ever after and reached Satya Loka at the end of his life.

# कथानुवादः (३)

When the sages asked for more stories, Sage Soota narrated the story of a businessman called Sadhu. He once saw a king called Ulkamukha performing the ritual of Lord Satya Narayana on the banks of river Bhadrashila. He asked the king what he was doing. King told him that he had everything but no children and was doing the ritual to beget a child. The businessman also was childless. He learnt the ritual from the king and vowed that he would do it if he got a child. His wife Lilavati gave birth to a beautiful young girl named Kalavati after one year. When wife reminded him of the vow, he said, "we will do the ritual of Lord Satya Narayana at her wedding". When the girl grew up, he got her married and yet did not perform the ritual. Lord wanted to teach him a lesson.

That businessman went to the far away city of Ratnasanu for business in a ship with his son-inlaw. When got off the ship and entered the city, some thieves who robbed the king's palace came running. They left some bags of money there and ran away. The palace guards running after them saw the bags next to them, assumed them to be thieves and took them to king Chandraketu. The king did not ask any questions and imprisoned them.

Back home, there were thieves even in the house of that businessman and they stole all the money. Lilavati and Kalavati started living by begging. Oneday, Kalavati came home late in the night. When her mother asked her the reason for delay, she said that a brahmana was performing the ritual of Lord Satya Narayana and she stayed till the end. She gave some prasadam to her mother. Then Lilavati remembered her husband's unfulfilled vow. She decided

to do the ritual herself on a good day coming in a few days, on the ocean beach.

Lord was pleased, came in the dream of king Chandraketu and told him what happened. King narrated his dream to everyone. He gave a lot of money to Sadhu and his son-in-law and freed them.

# कथानुवादः (४)

When their ship reached their town, Lilavati and Kalavati had just finished their ritual of Lord Satya Narayana on the beach. Kalavati got up without eating prasadam and ran towards the ocean in excitement. Then it appeared like the ship and her husband sank in the ocean. When she was very sad, a voice told her it was because she did not eat prasadam. When she went back and took prasadam, she saw that the ship and her husband were fine.

When Sadhu found out all this, he was awestruck. He performed the ritual twice every month – on the Full Moon night and solar ingress day. He lived happily ever after and reached Satya Loka at the end of his life.

# कथानुवादः (५)

A king called Tungadhwaja went to a forest for hunting and saw some forest dwellers performing the ritual of Lord Satya Narayana under a banyan tree. He was not impressed by their idols and vessels made of clay. When they respectfully gave him prasadam, he threw it away and left. Lord wanted to teach him a lesson.

His enemies surprised him by getting together and attacking him. He lost his kingdom, wealth and children.

He regretted that he had insulted Lord Satya Narayana because of his lowly impresseion of those forest dwellers. He went back to the forest, found them, sat along with them and performed a ritual of Lord Satya Narayana with the same clay idols and vessels used by them and ate the prasadam made by them. He went back to his city, collected some loyal soldiers and attacked his enemies. They were not ready and lost the battle. He got back his kingdom, wealth and many children were born again. He lived happily ever after and reached Satya Loka at the end of his life.

Sage Soota said, "O great sages, this ritual of Lord Satya Narayana gives direct results in Kali yuga. By performing it or watching it, human beings can overcome their problems."

.. Thus ends the story of the ritual of Lord Satya Narayana from Reva khanda of Skanda Purana ..

# पुनःपूजा

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥
सकलाराधनैः स्वर्चितमस्तु॥

धूर॑सि॒ धूर्व॒ धूर्व॑न्तं॒ धूर्व॒तं यो᳚ऽस्मान् धूर्व॑ति॒ तं धू᳚र्व॒यं व॒यं
धूर्वा॑मः॥

वनस्पतिरसोत्पन्नो गन्धाढ्यो धूप उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥
धूपमाघ्रापयामि।

उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम।
पशूंश्च मह्यमावह जीवनं च दिशोदिश॥

ज्योतिः शुक्रश्च तेजश्च देवानां सततं प्रियः ।
प्रभाकरो महातेजा दीपोऽयं प्रतिगृह्यताम् ॥
दीपं दर्शयामि।

(देवस्य पुरतश्चतुरस्रमण्डले नैवेद्यं संस्थाप्य, गायत्र्या प्रोक्ष्य)

देवस्य त्वा° हस्ताभ्याम्॥
सशक्तिसाङ्गसायुधसवाहनसपरिवार श्रीसत्यनारायणाय नमः।
नैवेद्यार्थे इदं भक्ष्यभोज्यचोष्यखाद्यलेह्यपेयचतुर्विधान्ननैवेद्यं
निवेदयामि॥

उत्तरापोशनं समर्पयामि। हस्तप्रक्षालनं समर्पयामि। मुखप्रक्षालनं
समर्पयामि। गण्डूषं समर्पयामि। शुद्धाचमनं समर्पयामि।
करोद्वर्तनार्थे चन्दनं समर्पयामि।

नारिकेलफलं दिव्यं सुस्वादूदकसंयुक्तम् ।
कदलीपक्वसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
नारिकेलखण्डकदलीपक्वनैवेद्यं समर्पयामि।

पूगीफासमायुक्तमिति ताम्बूलं समर्पयामि॥

वि॒श्वतः॑ ० एकः॑॥

त्वद्भासा भासते लोकः कोटिसूर्यसमप्रभ ।

नीराजयिष्ये त्वां विष्णो कृपां कुरु मम प्रभो ॥

मङ्गलनीराजनं समर्पयामि।

य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वाः। तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन्।

ते ह॒ नाकं॑ महि॒मानः॑ सचन्ते। यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः॥

मन्त्रपुष्पाञ्जलिं पूजान्यूनत्वाधिक्यपूरणम् ।

ददामि तन्त्रपौराणमन्त्रोच्चारणपूर्वकम् ॥

मन्त्रपुष्पं समर्पयामि।

यानि कानि चेति प्रदक्षिणां समर्पयामि।

पापोऽहं ० पापहरो भव॥

सत्यनारायणं देवं वन्देऽहं कामदं प्रभुम् ।

लीलया विततं विश्वं येन तस्मै नमो नमः ॥

नमस्कारान् समर्पयामि।

अन्यथा शरणं ० पुरुषोत्तम ॥

प्रार्थनां समर्पयामि।

यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥
ॐ तत् सत् श्रीसत्यनारायणः प्रियताम्।

पूजामध्ये स्वरवर्णमन्त्रतन्त्रलोपप्रायश्चित्तार्थं नामत्रयजपं अहं करिष्ये – ॐ अच्युताय नमः। ॐ अनन्ताय नमः। ॐ गोविन्दाय नमः॥

श्रद्धां मेधां ० मे पुरुषोत्तम॥
प्रसीद प्रसादं देहि।

नारायणप्रसादं तु गृहीत्वा भक्तिभावतः ।
सर्वान् कामानवाप्नोति प्रेत्य सायुज्यमाप्नुयात् ॥

उत्तिष्ठ ब्रह्मणस्पते। देवयन्तंस्त्वेमहे। उपप्रयन्तु मरुतः सुदानवः। इन्द्र प्राशूर्भवा सचा॥

यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकाम्यार्थसिद्ध्यर्थं पुनरागमनाय च ॥
ॐ भूः आवाहितदेवता उद्वासयामि। ॐ भुवः० ॐ सुवः० ॐ भूर्भुवःसुवः० आवाहितदेवता उद्वासयामि॥

# प्रोक्षणप्राशने

(ततो विष्णुसूक्तेन, इदं विष्णुः, त्रीणिपदा, विष्णोः कर्माणि, तद्विष्णोः तद्विप्रास इति पञ्चभिः॥ देवस्य त्वा इति वैदिकमन्त्रैः)

सुरास्त्वामभिषिञ्चन्तु ब्रह्माविष्णुमहेश्वराः ।
इन्द्राद्या मातरः सर्वा लक्ष्मीश्चोमा सरस्वती ॥

कश्यपाद्याश्च मुनयो गङ्गाद्याः सरितस्तथा ।
अनन्तादि महानागा गिरयः सप्तसागराः ॥

सर्वे त्वामभिषिञ्चन्तु सर्वकाम्यार्थसिद्धये ।
सूर्यादयो ग्रहाः सर्वे साधिप्रत्यधिदेवताः ॥

पृथिव्यादीनि भूतानि विघ्नो दुर्गादयस्तथा ।
एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥

अथ तीर्थप्राशनं कुर्यात् –
पादोदकं सत्यदेव नरो यः पिबते तव ।
तस्यान्तर्गतजं पापं नश्यत्येव न संशयः ॥

# व्रतकथा

## प्रथमोऽध्यायः

व्यास उवाच –

एकदा नैमिषारण्ये ऋषयः शौनकादयः

प्रपच्छुर्मुनयः सर्वे सूतं पौराणिकं खलु १

ऋषय ऊचुः –

व्रतेन तपसा वाऽपि प्राप्यते वाञ्छितं फलम्

तत्सर्वं श्रोतुं इच्छामः कथयस्व महामुने २

श्रीसूत उवाच –

नारदेनैव संपृष्टो भगवान् कमलापतिः

सुरर्षये यथा प्राह तच्छृणुध्वं समाहिताः ३

Vyāsa narrated: Once upon a time, śaunaka and other ṛṣi-s approached sage sūta in the forests of naimiṣāraṇya. The ṛṣi-s asked him “O muni! By what vrata or tapas can we fulfill our desires?” Sūta replied “Once nārada asked viṣṇu the same question. Listen carefully.”

एकदा नारदो योगी परानुग्रहकाङ्क्षया

पर्यटन् विविधाल्लोकान् मर्त्यलोकं उपागतः ४

ततो दृष्ट्वा जनान् सर्वान् नाना-क्लेश-समन्वितान्

नाना-योनि-समुत्पान्नान् क्लिश्यमानान् स्वकर्मभिः ५

केनोपायेन चैतेषां दुःख-नाशो भवेद् ध्रुवम्
इति संचिन्त्य मनसा विष्णु-लोकं गतस्तदा ६

Once, while visiting various worlds, nārada approached the land of mortals. There, he saw beings, born of various wombs, troubled by their prior karma. Thinking about how the suffering could be destroyed, he went to viṣṇu-loka.

तत्र नारायणं देवं शुक्लवर्णं चतुर्भुजम्
शङ्ख-चक्र-गदा-पद्म-वनमाला-विभूषितम् ७
दृष्ट्वा तं देव-देवेशं स्तोतुं समुपचक्रमे

There, he saw the white-coloured, four-armed nārāyaṇa, adorned with śañkha (conch), cakra (discus), gadā (mace), padma (lotus) and vanamāla (garland). He prayed . . .

नारद उवाच –
नमो वाङ्मनसातीत-रूपायाऽनन्तशक्तये
आदि-मध्यान्त-हीनाय निर्गुणाय गुणात्मने ८

सर्वेषां आदिभूताय भक्तानां आर्ति-नाशिने
श्रुत्वा स्तोत्रं ततो विष्णुर्नारदं प्रत्यभाषत ९

Salutations to you who is all-powerful; who is beyond speech and thought; who has neither beginning nor end; who is beyond form, and is endowed with all good qualities. Salutations to you who is the source of all creation; who destoys the afflictions of all his bhakta-s.

श्रीभगवानुवाच –

किमर्थं आगतोऽसि त्वं किं ते मनसि वर्तते
कथयस्व महाभाग! तत्सर्वं कथयामि ते १०

Viṣṇu replied – "O ṇarada! Please tell me why you've come."

नारद उवाच –

मर्त्य-लोके जनाः सर्वे नाना-क्लेश-समन्विताः
नाना-योनि-समुत्पन्नाः पच्यन्ते पाप-कर्मभिः ११

तत् कथं शमयेन्नाथ! लघूपायेन तद् वद्
श्रोतुं इच्छामि तत्सर्वं कृपाऽस्ति यदि ते मयि १२

Nārada replied – "In the land of mortals, beings born of various wombs are afflicted by the results of their karmas. Please tell me a simple remedy for these problems."

श्रीभगवानुवाच –

साधु पृष्टं त्वया वत्स! लोकानुग्रह-काङ्क्षया
यत् कृत्वा मुच्यते मोहात् तच्छृणुष्व वदामि ते १३

व्रतं अस्ति महत्पुण्यं स्वर्गे मर्त्ये च दुर्लभम्
तव स्नेहान्मया वत्स प्रकाशः क्रियतेऽधुना १४

सत्यनारायणस्येदं व्रतं सम्यग्विधानतः
कृत्वा सद्यः सुखं भुक्त्वा परत्र मोक्षं आप्नुयात् १५

Bhavagān replied – “Dear child, you are appropriately asking this question out of a desire to help others. There is a rare satyanārāyaṇa vrata which confers puṇya. It gives all comforts immediately, and mokṣa thereafter.”

तच्छ्रुत्वा भगवद्वाक्यं नारदो मुनिरब्रवीत्

नारद उवाच –

किं फलं किं विधानं च कृतं केनैव तद्व्रतम् १६

तत्सर्वं विस्तराद् ब्रूहि कदा कार्यं हि तद्व्रतम्

Nārada asked – “How and when should the vrata be performed, and what are the results?”

श्रीभगवानुवाच –

दुःख-शोकादि-शमनं धन-धान्य-प्रवर्धनम् १७

सौभाग्य-सन्ततिकरं सर्वत्र विजय-प्रदम्

यस्मिन् कस्मिन् दिने मर्त्यो भक्ति-श्रद्धा-समन्वितः १८

Bhagavān said – “The vrata supresses unhappiness and misery. It increases wealth and prosperity, and provides children. It gives success in every venture. With bhakti, it can be performed on any day.”

सत्यनारायणं देवं यजेत् तुष्टो निशा-मुखे

ब्राह्मणैर्बान्धवैश्चैव सहितो धर्म-तत्परः १९

नैवेद्यं भक्तितो दद्यात् प्रसादं भक्ष्यं उत्तमम्

रम्भा-फलं घृतं क्षीरं गोधूमस्य च चूर्णकम् २०

अभावे शालि-चूर्णं वा शर्करा वा गुडस्तथा

सपादं सर्व-भक्ष्याणि चैकीकृत्य निवेदयेत् २१

“Pray to satyanārāyaṇa during the evening twilight, along with brāhmaṇa-s and relatives. Prasādam made out of equal parts of bananas, ghee, milk and wheat flour should be offered to him.”

विप्राय दक्षिणां दद्यात् कथां श्रुत्वा जनैः सह

ततश्चबन्धुमिः सार्धं विप्रांश्च प्रतिभोजयेत् २२

प्रसादं भक्षयेद् भक्त्या नृत्य-गीतादिकं चरेत्

ततश्च स्वगृहं गच्छेत् सत्यनारायणं स्मरन् २३

एवं कृते मनुष्याणां वाञ्छा-सिद्धिर्भवेद् ध्रुवम्

विशेषतः कलि-युगे लघूपायोऽस्ति भूतले २४

“After listening to the satyanārāyaṇa-kathā, offer dakṣiṇa and bhojanam to the priest. After eating the prasādam, and after the singing and dancing, return home thinking about satyanārāyaṇa. This simple remedy will fulfull all desires, especially in kali-yuga.”

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः

प्रथमोऽध्यायः ॥

# द्वितीयोऽध्यायः

भगवान् उवाच –

अथान्यत् संप्रवक्ष्यामि कृतं येन पुरा द्विज

कश्चित् काशीपुरे रम्ये ह्यासीद् विप्रोऽतिनिर्धनः १

क्षुत्-तृड्भ्यां व्याकुलो भूत्वा नित्यं बभ्राम भूतले

दुःखितं ब्राह्मणं दृष्ट्वा भगवान् ब्राह्मण-प्रियः २

वृद्धब्राह्मण-रूपस्तं पप्रच्छ द्विजं आदरात्

किमर्थं भ्रमसे विप्र! महीं नित्यं सुदःखितः ३

तत्सर्वं श्रोतुं इच्छामि कथ्यतां द्विजसत्तम

Bhagavān told nārada – “I will now tell you about a dvija who performed this vrata in the past. There was a very poor brahmin who lived in kāśī. Severly afflicted by thirst and hunger, he used to wander the earth. Upon seeing him, bhagavān disguised himself as a very old brahmin, and asked him ‘O Brahmin! Why are you wandering around daily, so full of sadness?’ ”

ब्राह्मण उवाच –

ब्राह्मणोऽतिदरिद्रोऽहं भिक्षार्थं वै भ्रमे महीम् ४

उपायं यदि जानासि कृपया कथय प्रभो

He replied – “I am a very poor brahmin who wanders the earth for alms. If you know a way out, please tell me what it is.”

वृद्धब्राह्मण उवाच –

सत्यनारायणो विष्णुर्वाञ्छितार्थफलप्रदः ५

तस्य त्वं पूजनं विप्र कुरुष्व व्रतं उत्तमम्
यत् कृत्वा सर्वदुःखेभ्यो मुक्तो भवति मानवः ६

Bhagavān in the form of the eldery brahmin said – "Viṣṇu in the form of satyanārāyaṇa confers all desires. By performing his vrata, you will become free of all sorrows."

श्रीभगवान् उवाच –

विधानं च व्रतस्यापि विप्रायाऽऽभाष्य यत्नतः
सत्यनारायणो वृद्धस्तत्रैवान्तरधीयत् ७

Bhagavān told nārada – "After telling the poor brahmin how to perform the vrata, lord satyanārāyana disappeared."

तद् व्रतं सङ्करिष्यामि यदुक्तं ब्राह्मणेन वै
इति संचिन्त्य विप्रोऽसौ रात्रौ निद्रां न लब्धवान् ८

ततः प्रातः समुत्थाय सत्यनारायणव्रतम्
करिष्य इति सङ्कल्प्य भिक्षार्थं अगमत् द्विजः ९

तस्मिन्नेव दिने विप्रः प्रचुरं द्रव्यं आप्तवान्
तेनैव बन्धुभिः सार्धं सत्यस्य व्रतं आचरत् १०

The poor brahmin thought of performing the vrata, but didn't get any sleep that night. In the morning, he took a

saṅkalpa to perform the satyanārāyaṇa-vrata, and went begging for alms. That day, he was offered a lot of alms, with which he performed the vrata.

सर्वदुःखविनिर्मुक्तः सर्व-सम्पत्-समन्वितः
बभूव स द्विज-श्रेष्ठो व्रतस्यास्य प्रभावतः ११

ततः प्रभृति कालं च मासि मासि व्रतं कृतम्
एवं नारायणस्येदं व्रतं कृत्वा द्विजोत्तमः १२

सर्व-पाप-विनिर्मुक्तो दुर्लभं मोक्षं आप्तवान्
व्रतं अस्य यदा विप्र! पृथिव्यां सङ्करिष्यति १३
तदैव सर्व-दुःखं तु मनुजस्य विनश्यति

Because of the vrata, he was endowed with wealth, and became free of all sorrow. From then onwards, he performed the vrata every month. He became free of all sin, and obtained mokṣa. O nārada! Whenever this vrata is performed, all of man's sins are destroyed.

सूत उवाच –
एवं नारायणेनोक्तं नारदाय महात्मने १४
मया तत्कथितं विप्राः किं अन्यत् कथयामि वः

After telling śaunaka and the other ṛṣi-s what bhagavān told nārada, sūta asked them if there was anything else they wanted to know.

ऋषयः ऊचुः –

तस्माद् विप्राच्छ्रुतं केन पृथिव्यां चरितं मुने
तत्सर्वं श्रोतुं इच्छामः श्रद्धाऽस्माकं प्रजायते १५

The ṛṣi-s asked – "Please tell us about those who performed the vrata, after hearing about it from this brahmin."

सूत उवाच –

श्रृणुध्वं मुनयः सर्वे व्रतं येन कृतं भुवि
एकदा स द्विज-वरो यथा-विभवविस्तरैः १६

बन्धुभिः स्वजनैः सार्धं व्रतं कर्तुं समुद्यतः
एतस्मिन्नन्तरे काले काष्ठक्रेता समागमत् १७

बहिः काष्ठं च संस्थाप्य विप्रस्य गृहं आययौ
तृष्णया पीडितात्मा च दृष्ट्वा विप्रं कृत-व्रतम् १८

प्रणिपत्य द्विजं प्राह किं इदं क्रियते त्वया
कृते किं फलं आप्नोति विस्तराद् वद मे प्रभो १९

Sūta said – "O muni-s! Once, when this brahmin was performing this vrata with his relatives with fanfare, a wood-seller came near. He left his pile of wood outside, and entered the brahmin's house. The wood-seller, suffering from the thirst saw the brahmin who had performed the vrata. He bowed to him, and asked – 'What is the vrata that you have performed, and what are its results?' "

विप्र उवाच –

सत्यनारायणस्येदं व्रतं सर्वेप्सित-प्रदम्

(दुःख-दारिद्र्य-शमनं पुत्र-पौत्र-विवर्धनम्)

तस्य प्रसादान्मे सर्वं धन-धान्यादिकं महत् २०

The brahmin replied "This is the satyanārāyaṇa-vrata which confers all desires. It removes sorrow and poverty, and provides children and grand-children. With its boons, I've obtained all my wealth and prosperity"

तस्माद् एतद् व्रतं ज्ञात्वा काष्ठ-क्रेताऽतिहर्षितः

पपौ जलं प्रसादं च भुक्त्वा च नगरं ययौ २१

सत्यनारायणं देवं मनसा इत्यचिन्तयत्

काष्ठ-विक्रयतो ग्रामे प्राप्यते चाद्य यद् धनम् २२

तेनैव सत्यदेवस्य करिष्ये व्रतं उत्तमम्

इति सञ्चिन्त्य मनसा काष्ठं धृत्वा तु मस्तके २३

जगाम नगरे रम्ये धनिनां यत्र संस्थितिः

तद्दिने काष्ठ-मूल्यं च द्विगुणं प्राप्तवान् असौ २४

Having learnt the vrata from him, the happy wood-seller drank some water, had the prasādam and went to the city, thinking of satyanāryāyaṇa. He resolved to perform the vrata with the wealth he earned that day by selling wood. Placing the wood on his head, he went to the beautiful city where the rich people lived, and earned twice what his normal earnings.

ततः प्रसन्न-हृदयः सुपक्वं कदली-फलम्
शर्करा-घृत-दुग्धं च गोधूमस्य च चूर्णकम् २५

कृत्वैकत्र सपादं च गृहीत्वा स्वगृहं ययौ
ततो बन्धून् समाहूय चकार विधिना व्रतम् २६

तद्व्रतस्य प्रभावेण धन-पुत्रान्वितोऽभवत्
इह-लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ २७

With a content heart, he took ripe bananas, sugar, ghee, milk and wehat flour. He made the prasādam, went home, called his relatives, and performed the vratam. Because of it, he gained children and riches. Having enjoyed the fruits of this world, he went to the the satya-loka.

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः
द्वितीयोऽध्यायः ॥

# तृतीयोऽध्यायः

सूत उवाच –
पुनरग्रे प्रवक्ष्यामि श्रृणुध्वं मुनिसत्तमाः
पुरा उल्कामुखो नाम नृपश्चासीन्महामतिः १

जितेन्द्रियः सत्यवादी ययौ देवालयं प्रति
दिने दिने धनं दत्त्वा द्विजान् सन्तोषयन् सुधीः २

भार्या तस्य प्रमुग्धा च सरोजवदना सती
भद्रशीला नदी-तीरे सत्यस्य व्रतं आचरत् ३

Sūta said – "Please continue. There was a king named ulkāmukha who had conquered his senses, and always spoke the truth. He went to the temple daily and gave money to the brahmins. He had a charming, virtuous wife with a beautiful face. Once, he was performing the vrata on the banks of a river."

एतस्मिन्नन्तरे तत्र साधुरेकः समागतः
वाणिज्यार्थं बहुधनैरनेकैः परिपूरिताम् ४

नावं संस्थाप्य तत्तीरे जगाम नृपतिं प्रति
दृष्ट्वा स व्रतिनं भूपं प्रपच्छ विनयान्वितः ५

साधुरुवाच –
किं इदं कुरुषे राजन्! भक्तियुक्तेन चेतसा
प्रकाशं कुरु तत्सर्वं श्रोतुं इच्छामि साम्प्रतम् ६

A trader named sādhu, with a boat full of various riches approached. He saw the king performing a vrata, and humbly asked him – "O king! Please tell him what you are performing with such bhakti."

राजोवाच –
पूजनं क्रियते साधो! विष्णोरतुलतेजसः
व्रतं च स्वजनैः सार्धं पुत्राद्यावाप्तिकाम्यया ७

The king replied – “Along with my relatives, I am performing the incomparable vrata of viṣṇu, out of a desire for children and other riches.”

भूपस्य वचनं श्रुत्वा साधुः प्रोवाच सादरम्
सर्वं कथय मे राजन्! करिष्येऽहं तवोदितम् ८

ममाऽपि सन्ततिर्नास्ति ह्येतस्माज्ञायते ध्रुवम्
ततो निवृत्य वाणिज्यात् सानन्दो गृहमागतः ९

After hearing the king’s words, sādhu said “Please tell me everything. I will also do what you tell me, since I too have no children.” Then, after finishing his trading, he went home happy.

भार्यायै कथितं सर्वं व्रतं सन्तति-दायकम्
तदा व्रतं करिष्यामि यदा मे सन्ततिर्भवेत् १०

इति लीलावतीं प्राह पत्नीं साधुः स सत्तमः
एकस्मिन् दिवसे तस्य भार्या लीलावती सती ११

भर्तृ-युक्ताऽऽनन्दचित्ताऽभवद् धर्मपरायणा
गर्भिणी साभवत् तस्य भार्या सत्यप्रसादतः १२
(पूर्णे गर्भे ततो जाता बालिका चातिसुन्दरी)

दशमे मासि वै तस्याः कन्या-रत्नं अजायत
दिने दिने सा ववृधे शुक्लपक्षे यथा शशी १३

The trader told his wife līlāvatī about the vrata which confered progreny, and resolved to perform it when he was blessed with children. Then, one day, līlāvatī became pregnant due to the blessings of satyanārāyaṇa. After ten months, she gave birth to a jewel of a daughter. Each day, she grew like the waxing moon.

(ततो वणिक् सुतायाश्च जातकादीन् समाप्य च)
नाम्ना कलावती चेति तन्नामकरणं कृतम्

ततो लीलावती प्राह स्वामिनं मधुरं वचः १४
न करोषि किमर्थं वै पुरा सङ्कल्पित-व्रतम्

साधुरुवाच –
विवाह-समये त्वस्या करिष्यामि व्रतं प्रिये १५
इति भार्यां समाश्वास्य जगाम नगरं प्रति

When they named the daughter kalāvatī, his wife līḻāvatī asked him, “Why aren’t you performing the satyanārāyaṇa-vrata which you’ve previously resolved to perform?” Sādhu told his wife,  “I’ll perform the vratam when she gets married”, and went into the city.

ततः कलावती कन्या ववृधे पितृ-वेश्मनि १६
दृष्ट्वा कन्यां ततः साधुर्नगरे सखिभिः सह

मन्त्रयित्वा द्रुतं दूतं प्रेषयामास धर्मवित् १७
विवाहार्थं च कन्यायाः वरं श्रेष्ठं विचारय

तेनाऽऽज्ञप्तश्च दूतोऽसौ काञ्चनं नगरं ययौ १८
तस्मादेकं वणिक्पुत्रं समादायागतो हि सः

दृष्ट्वा तु सुन्दरं बालं वणिक्पुत्रं गुणान्वितम् १९
ज्ञातिभिर्बन्धुभिः सार्धं परितुष्टेन चेतसा
दत्तवान् साधु पुत्राय कन्यां विधिविधानतः २०

Kalāvatī grew into a beautiful girl in her father's house. Sādhu sent a messenger to enquire into suitable grooms. He fount a suitable trader groom, and brought him to sādhu. After seeing the virtuous, handsome boy, sādhu along with friends and relatives gave kalāvatī in marriage to him.

ततोऽभाग्यवशात् तेन विस्मृतं व्रतं उत्तमम्
विवाह-समये तस्यास्तेन रुष्टोऽभवत्प्रभुः २१

ततः कालेन कियता निज-कर्म-विशारदः
वाणिज्याय गतः शीघ्रं जामातृ-सहितो वणिक् २२

रत्नसार-पुरे रम्ये गत्वा सिन्धु-समीपतः
वाणिज्यं अकरोत् साधुर्जामात्रा श्रीमता सह २३
तौ गतौ नगरे रम्ये चन्द्रकेतोनृर्पस्य च

Unfortunately, he forgot about the vratam. At the time of līlāvatī's marriage, satyanārāyaṇa became angry. Sādhu became engrossed in his daily duties, and went about his business with his son-in-law. They went to the king Candraketu's beautiful city of ratna-sāra, near the ocean.

एतस्मिन्नेव काले तु सत्यनारायणः प्रभुः २४
भ्रष्ट-प्रतिज्ञं आलोक्य शापं तस्मै प्रदत्तवान्
दारुणं कठिनं चास्य महद्दुःखं भविष्यति २५

Satyanārāyaṇa looked at sādhu who had repeatedly broken his promise, and cursed him with great, terrible sadness.

एकस्मिन् दिवसे राज्ञो धनं आदाय तस्करः
तत्रैव चागतश्चोरो वणिजौ यत्र संस्थितौ २६

तत्पश्चाद् धावकान् दूतान् दृष्टवा भीतेन चेतसा
धनं संस्थाप्य तत्रैव स तु शीघ्रं अलक्षितः २७

One day, a thief stole Candraketu's wealth, and went past the two traders. Looking at the soldiers following them, they dropped the stolen wealth, and ran away unnoticed.

ततो दूताः समायाता यत्राऽऽस्ते सज्जनो वणिक्
दृष्ट्वा नृप-धनं तत्र बद्ध्वाऽऽवेतौ वणिक्सुतौ २८

हर्षेण धावमानाश्च प्रोचुर्नृप-समीपतः
तस्करौ द्वौ समानीतौ विलोक्याऽऽज्ञापय प्रभो २९

The soldiers arrived near the trader, saw the king's wealth, and arrested him and his son-in-law. The soldiers ran back to the king and told him, "We've brought the two theives. Please tell us what to do."

राज्ञाऽऽज्ञप्तास्ततः शीघ्रं दृढं बद्धा तु तावुभौ
स्थापितौ द्वौ महादुर्गे कारा-ग्रहेऽविचारतः ३०

मायया सत्यदेवस्य न श्रुतं कैस्तयोर्वचः
अतस्तयोर्धनं राज्ञा गृहीतं चन्द्रकेतुना ३१

तच्छापाच्च तयोर्गेहे भार्या चैवातिदुःखिता
चौरेणापहृतं सर्वं गृहे यच्च स्थितं धनम् ३२

आधिव्याधिसमायुक्ता क्षुत्पिपासातिदुःखिता
अन्न-चिन्ता-परा भूत्वा बभ्राम च गृहे गृहे ३३
कलावती तु कन्याऽपि बभ्राम प्रतिवासरम्

The king ordered them to jail the theives out-of-sight. Because of satyanārāyaṇa's māyā, their wealth was seized by the king, and no one listened to their side of the story. No one knew of their whereabouts. Furthur, līlāvatī was equally depressed and all of their wealth at home was also stolen by thieves. Opressed by disease, hunger and thirst, they went rom house to house begging for alms. Even their daughter, kalāvatī, wandered each day in search of food.

एकस्मिन् दिवसे याता क्षुधार्ता द्विज-मन्दिरम्
गत्वाऽपश्यद् व्रतं तत्र सत्यनारायणस्य च ३४

उपविश्य कथां श्रुत्वा वरं प्रार्थितवत्यपि
प्रसाद-भक्षणं कृत्वा ययौ रात्रौ गृहं प्रति ३५

One day, while wandering due to the pangs of hunger, she went to the house of a dvija, and saw the satyanārāyaṇa-vratam being performed. She listened to the kathā, prayed to satyanārāyaṇa, took some prasādam, and returned home at night.

माता कलावतीं कन्यां कथयामास प्रेमतः
पुत्रि! रात्रौ स्थिता कुत्र किं ते मनसि वर्तते ३६

कन्या कलावती प्राह मातरं प्रति सत्वरम्
द्विजालये व्रतं मात दृष्टं वाञ्छित-सिद्धिदम् ३७

Her mother kalāvatī asked her daughter, “Where have you been tonight?” Līlāvatī told her mother that she had at a dvija’s house observing a vratam which confers all desires.

तच्छ्रुत्वा कन्यका-वाक्यं व्रतं कर्तुं समुद्यता
सा मुदा तु वणिग्भार्या सत्यनारायणस्य च ३८

व्रतं चक्रे सैव साध्वी बन्धुभिः स्वजनै सह
भतृर्जामातरौ क्षिप्रं आगच्छेतां स्वं आश्रमम् ३९

इति देवं वरं याचे सत्यदेवं पुनः पुनः
अपराधं च मे भर्तुर्जामातुः क्षन्तुं अर्हसि

Having heard this, she got ready to perform the satyanārāyaṇa-vrata herself, with her friends and relatives. Agan and again, she prayed for her husband and son-in-law to return home quickly, asking satyanārāyaṇa to pardon their sins.

व्रतेनानेन तुष्टोऽसौ सत्यनारायणः प्रभुः ४०
दर्शयामास स्वप्नं हि चन्द्रकेतुं नृपोत्तमम्

बन्धिनौ मोचय प्रातर्वणिजौ नृपसत्तम ४१
देयं धनं च तत्सर्वं गृहीतं यत् त्वयाऽधुना

नो चेत् त्वां नाशयिष्यामि सराज्यं धन-पुत्रकम् ४२
एवं आभाष्य राजानं ध्यान-गम्योऽभवत् प्रभुः

Satyanārāyaṇa was pleased with the vrata and appeared in candraketu's dream. After telling him to release the prisoners, and restore their wealth, he went away.

ततः प्रभात-समये राजा च स्वजनैः सह ४३
उपविश्य सभा-मध्ये प्राह स्वप्नं जनं प्रति

बद्धौ महाजनौ शीघ्रं मोचय द्वौ वणिक्-सुतौ ४४
इति राज्ञो वचः श्रुत्वा मोचयित्वा महाजनौ
समानीय नृपस्याग्रे प्राहुस्ते विनयान्विताः ४५

In the morning, the king repeated his dream to his ministers. The traders were released, and brought in front of the king.

आनीतौ द्वौ वणिक्पुत्रौ मुक्तौ निगड-बन्धनात्
ततो महाजनौ नत्वा चन्द्रकेतुं नृपोत्तम् ४६

स्मृत्वा च पूर्व-वृत्तान्तं विस्मयात् भय-विह्वलौ
राजा वणिक्सुतौ वीक्ष्य वचः प्रोवाच सादरम् ४७

देवात् प्राप्तं महद्दुःखं इदानीं नास्ति वै भयम्
तदा निगड-संत्यागं क्षौर-कर्माद्यकारयत् ४८

Remembering the past, they traders bowed to Candraketu out of fear. King Candraketu looked them over and said respectfully, “Because of fate, you’ve had great sadness, but don’t worry about it any more.” He then released them from the chains, and had them shaved and cleaned up.

वस्त्रालङ्कारकं दत्त्वा पारितोष्य नृपश्च तौ
पुरस्कृत्य वणिक्पुत्रौ वचं आतोषयद् भृशम् ४९

पुराऽऽनीतं तु यद् द्रव्यं द्विगुणी-कृत्य दत्तवान्
प्रोवाज तौ ततो राजा गच्छ साधो! निजाश्रमम् ५०

राजानं प्रणिपत्याह गन्तव्यं त्वत्प्रसादतः
इत्युक्त्वा तौ महावैश्यौ जग्मतुः स्वगृहं प्रति ५१

The king gave them clothes, jewels, and doubled their previous wealth. He then told them to return to their house. The two vaiśya-s bowed before him, asked to leave with his blessings, and returned home.

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः
तृतीयोऽध्यायः ॥

# चतुर्थोऽध्यायः

सूत उवाच –

यात्रां तु कृतवान् साधुर्मङ्गलाचार-पूर्विकाम्

ब्राह्मणेभ्यो धनं दत्त्वा तदा तु नगरं ययौ १

Sūta continued, “Having finished his travels, Sādhu gave money to many brahmins and returned home”

कियद् दूरं गते साधौ सत्यनारायणः प्रभुः

जिज्ञासां कृतवान् साधो किं अस्ति तव नौ स्थितम् २

Satyanārāyaṇa wanted to know how far Sādhu had come, and asked him, “O Sādhu, what do you have in your boat?”

ततो महाजनौ मत्तौ हेलया च प्रहस्य वै

कथं पृच्छसि भो दण्डिन्! मुद्रां नेतुं किं इच्छसि ३

लता-पत्रादिकं चैव वर्तन्ते तरणौ मम

निष्ठुरं च वचः श्रुत्वा सत्यं भवतु ते वचः ४

एवं उक्त्वा गतः शीघ्रं दण्डी तस्य समीपतः

The two of them contemptuously replied, “O daṇḍin, do you wish to steal our goods? We only have some leaves and plants.” Satyanārāyaṇa replied, “May your words be true”, and left.

कियद् दूरं ततो गत्वा स्थितः सिन्धु-समीपतः ५

गते दण्डिनि साधुश्च कृत-नित्य-क्रियस्तदा

उत्थितां तरणिं दृष्ट्वा विस्मयं परमं ययौ ६
दृष्ट्वा लतादिकं चैव मूर्च्छितो न्यपतद् भुवि
लब्ध-संज्ञो वणिक्पुत्रस्ततश्चिन्तान्वितोऽभवत् ७

Sādhu went some distance away from the river, and finished his daily duties. He was surprised to see the boat riding high in the river. Seeing only creepers etc. in the boat, the fainted on the ground. When he regained consciousness, he started thinking.

तदा तु दुहितुः कान्तो वचनं चेदं अब्रवीत्
किमर्थं क्रियते शोकः शापो दत्तश्च दण्डिना ८

शक्यते तेन सर्वं हि कर्तुं चात्र न संशयः
अतस्तच्छरणं यामो वाञ्छितार्थो भविष्यति ९

His son-in-law said, “Why are you sad? The daṇḍī has cursed us. There’s no doubt that he can do anything. If we surrender to him, he will fulfill our wishes.”

जामातुर्वचनं श्रुत्वा तत्सकाशं गतस्तदा
दृष्ट्वा च दण्डिनं भक्त्या नत्वा प्रोवाच सादरम् १०

क्षमस्व चापराधं मे यदुक्तं तव सन्निधौ
(मया दुरात्मना देव मुग्धोऽहं तव मायया)
एवं पुनः पुनर्नत्वा महा-शोकाकुलोऽभवत् ११

After listening to his son-in-law, they went to the daṇḍī, saluted him, and said “Please forgive our sins and our

words. I have been completely deluded by your māyā.” They were completely distraught with sorrow.

प्रोवाच वचनं दण्डी विलपन्तं विलोक्य च
मा रोदीः श्रृणु मद्वाक्यं मम पूजा-बहिर्मुखः १२

ममाज्ञया च दुर्बुद्धे! लब्धं दुःखं मुहुर्मुहुः
तच्छ्रुत्वा भगवद्वाक्यं स्तुतिं कर्तुं समुद्यतः १३

The daṇḍī told the lamenting traders, “Don’t cry, and listen to me. Because of my wishes, you have repeatedly experienced sorrow.” Hearing this, they prayed –

साधुरुवाच –
त्वन्माया-मोहिताः सर्वे ब्रह्माद्यास्त्रिदिवौकसः
न जानन्ति गुणं रूपं तवाश्चर्यं इदं प्रभो १४

मूढोऽहं त्वां कथं जाने मोहितस्तव मायया
प्रसीद पूजयिष्यामि यथा-विभवविस्तरैः १५
पुरा वित्तं च तत्सर्वं त्राहि मां शरणागतम्

Everyone, including  is deluded by your māyā including brahma and the devā-s. They don’t know your wonderful guṇa-s and forms. Deluded by your māyā, how can I know you? I have surrendered at your feet. Be pleased by my worship, and restore my wealth and everything else.

श्रुत्वा भक्ति-युतं वाक्यं परितुष्टो जनार्दनः १६
वरं च वाञ्छितं दत्त्वा तत्रैवान्तर्दधे हरिः

ततो नावं समारुह्य दृष्ट्वा वित्त-प्रपूरिताम् १७
कृपया सत्यदेवस्य सफलं वाञ्छितं मम

इत्युक्त्वा स्वजनैः सार्धं पूजां कृत्वा यथाविधि १८
हर्षेण चाभवत् पूर्णः सत्यदेव-प्रसादतः
नावं संयोज्य यत्नेन स्वदेश-गमनं कृतम् १९

Having heard their words, full of bhakti, Janārdana was pleased. He fulfilled their wishes, and disappeared. They entered their boat, which was full of their wealth, and exclaimed, “Because of the mercy of Satyadeva, our desires have been fulfilled.” Along with their friends, they performed the pūjā. Delighted with the pradādam of satyadeva, they returned home.

साधुर्जामातरं प्राह पश्य रत्नपुरीं मम
दूतं च प्रेषयामास निज-वित्तस्य रक्षकम् २०

ततोऽसौ नगरं गत्वा साधुभार्यां विलोक्य च
प्रोवाच वाञ्छितं वाक्यं नत्वा बद्धाञ्जलिस्तदा २१

निकटे नगरस्यैव जामात्रा सहितो वणिक्
आगतो बन्धुवर्गैश्च वित्तैश्च बहुभिर्युतः २२

Sādhu told his son-in-law, “Look at my city, ratna-purī”, and sent a messenger, who told his family that he had returned with a lot of wealth.

श्रुत्वा दूत-मुखाद् वाक्यं महा-हर्षवती सती
सत्यपूजां ततः कृत्वा प्रोवाच तनुजां प्रति २३

व्रजामि शीघ्रं आगच्छ साधु-संदर्शनाय च
इति मातृ-वचः श्रुत्वा व्रतं कृत्वा समाप्य च २४
प्रसादं च परित्यज्य गता साऽपि पतिं प्रति

Having heard the messenger's words, a delighted Līlāvatī, performed the satyanārāyaṇa-pūjā and told her daughter, "I am leaving. Come quickly to see Sādhu." Kalāvatī finished the pūjā, but she too left before the prasādam.

तेन रुष्टः सत्यदेवो भर्तारं तरणिं तथा २५
संहृत्य च धनैः सार्धं जले तस्यावमज्ञयत्

ततः कलावती कन्या न विलोक्य निजं पतिम् २६
शोकेन महता तत्र रुदती चापतद् भुवि

दृष्ट्वा तथा विधां नावं कन्या च बहु-दुःखिताम् २७
भीतेन मनसा साधुः किमाश्चर्यं इदं भवेत्
चिन्त्यमानाश्च ते सर्वे बभूवुस्तरि-वाहकाः २८

Satyanārāyaṇa became angry, and took away the wealth, and sunk the boat. Kalāvatī, who was unable to find her husband, became depressed, and fell on the ground. Everyone became frightened, and wondered about what was happening.

ततो लीलावती कन्यां दृष्ट्वा सा विह्वलाऽभवत्
विललापातिदुःखेन भर्तारं चेदं अब्रवीत २९

इदानीं नौकया सार्धं कथं सोऽभूद् अलक्षितः
न जाने कस्य देवस्य हेलया चैव सा हृता ३०

सत्यदेवस्य माहात्म्यं ज्ञातुं वा केन शक्यते
इत्युक्त्वा विललापैव ततश्च स्वजनैः सह ३१

Līlāvatī saw her daughter lamenting, and spoke to Sādhu, "How did our son-in-law suddenly disappear along with the boat? I don't know why he has angrily taken him away. Who can understand the greatness of Satyanārāyaṇa?" Along with her relatives, she also lamented.

ततो लीलावती कन्यां क्रौडे कृत्वा रुरोद ह
ततः कलावती कन्या नष्टे स्वामिनि दुःखिता ३२

गृहीत्वा पादुके तस्यानुगन्तुं च मनोदधे
कन्यायाश्चरितं दृष्ट्वा सभार्यः सज्जनो वणिक् ३३

अतिशोकेन सन्तप्तश्चिन्तयामास धर्मवित्
हृतं वा सत्यदेवेन भ्रान्तोऽहं सत्यमायया ३४

सत्यपूजां करिष्यामि यथा-विभवविस्तरैः
इति सर्वान् समाहूय कथयित्वा मनोरथम् ३५

Līlāvatī placed Kalāvatī's head in her lap and cried. Sādhu looked at the condition of his daughter and wondered if

this was another delusion created by Satyanārāyaṇa's māyā. He resolved to perform the Satyanārāyaṇa-pūjā, and informed everyone of his decision.

नत्वा च दण्डवद् भूमौ सत्यदेवं पुनः पुनः
ततस्तुष्टः सत्यदेवो दीनानां परिपालकः ३६

जगाद वचनं चैनं कृपया भक्तवत्सलः
त्यक्त्वा प्रसादं ते कन्या पतिं द्रष्टुं समागता ३७

अतोऽदृष्टोऽभवत् तस्याः कन्यकायाः पतिर्ध्रुवम्
गृहं गत्वा प्रसादं च भुक्त्वा साऽऽयाति चेत् पुनः ३८
लब्ध-भर्त्री सुता साधो! भविष्यति न संशयः

He prostrated on the ground repeatedly, by which Satyanārāyaṇa, the saviour of the weak and destitute was pleased. Satyadeva, out of compassion, told them that the disappearance occurred since his daughter had forsaken the prasādam. If she went home and consumed it, she would regain her husband.

कन्यका तादृशं वाक्यं श्रुत्वा गगनमण्डलात् ३९
क्षिप्रं तदा गृहं गत्वा प्रसादं च बुभोज सा

सा पश्चात् पुनरागम्य ददर्श सुजनं पतिम् ४०
ततः कलावती कन्या जगाद पितरं प्रति

इदानीं च गृहं याहि विलम्बं कुरुषे कथम् ४१
तच्छ्रुत्वा कन्यका-वाक्यं सन्तुष्टोऽभूद् वणिक्सुतः
पूजनं सत्यदेवस्य कृत्वा विधि-विधानतः ४२

Kalāvatī heard the voice from the sky, and quickly went home to have the prasādam. When she returned, she saw her husband, and asked her father, "Why are you delaying now? Come home." Hearing this, her husband became happy, and performed the pūjā of satya-deva.

धनैर्बन्धुगणैः सार्धं जगाम निज-मन्दिरम्
पौर्णमास्यां च सङ्क्रान्तौ कृतवान् सत्यपूजनम् ४३

इह-लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ
(अवैष्णवानां अप्राप्यं गुणत्रयविर्वजितम्) ४४

He went home, and performed the Satyanārāyaṇa-pūjā during every paurṇimā and saṅkrānti. After enjoying the comforts of this world, he went to the world of Satya.

॥ इति श्रीस्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः चतुर्थोऽध्यायः ॥

# पञ्चमोऽध्यायः

सूत उवाच –
अथान्यच्च प्रवक्ष्यामि श्रुणुध्वं मुनि-सत्तमाः
आसीत तुङ्ग-ध्वजो राजा प्रजा-पालन-तत्परः १

प्रसादं सत्यदेवस्य त्यक्त्वा दुःखं अवाप सः
एकदा स वनं गत्वा हत्वा बहु-विधान् पशून् २

आगत्य वट-मूलं च दृष्ट्वा सत्यस्य पूजनम्
गोपाः कुर्वन्ति सन्तुष्टा भक्तियुक्ताः सबान्धवाः ३

Sūta continued, “I’m going to tell you another story. Please listen. There was a king named Tuṅga-dhvaja who cared for his subjects. He went through sorrow because he rejected the prasādam of Satyadeva. Once, he went hunting in the forest, and say the pūjā being performed under a Banyan tree by the cow-herds, with great bhakti along with their families.”

राजा दृष्ट्वा तु दर्पेण न गत्वा न ननाम सः
ततो गोप-गणाः सर्वे प्रसादं नृपसन्निधौ ४

संस्थाप्य पुनरागत्य भुक्त्वा सर्वे यथेप्सितम्
ततः प्रसादं संत्यज्य राजा दुःखं अवाप सः ५

तस्य पुत्रशतं नष्टं धनधान्यादिकं च यत्
सत्यदेवेन तत्सर्वं नाशितं मम निश्चितम् ६

Because of his pride, Tuṅgadhvaja did not prostrate before Satyadeva. The cowherds themselves brought some prasādam to the king, and then ate it to their hearts content. However, the king self it there, and experienced sadness. He lost all is sons, and his wealth and prosperity. He knew that all of this was due to Satyadeva.

अतस्तत्रैव गच्छामि यत्र देवस्य पूजनम्
मनसा तु विनिश्चित्य ययौ गोपालसन्निधौ ७

ततोऽसौ सत्यदेवस्य पूजां गोपगणैः सह
भक्ति-श्रद्धान्वितो भूत्वा चकार विधिना नृपः ८

सत्यदेव-प्रसादेन धनपुत्रान्वितोऽभवत्
इह-लोके सुखं भुक्त्वा चान्ते सत्यपुरं ययौ ९

He resolved to go to the place where the pūjā was being performed, and resolved to go to the cowherds. With great bhakti and śraddhā, he performed the pūjā with the cowherds, and went to the abode of Satya after experiences this world's happiness.

य इदं कुरुते सत्यव्रतं परमदुर्लभम्
श्रृणोति च कथां पुण्यां भक्तियुक्तः फलप्रदाम् १०

धनधान्यादिकं तस्य भवेत् सत्यप्रसादतः
दरिद्रो लभते वित्तं बद्धो मुच्येत बन्धनात् ११

भीतो भयात् प्रमुच्येत सत्यं एव न संशयः
ईप्सितं च फलं भुक्त्वा चान्ते सत्यपुरं व्रजेत् १२

Whoever performes this rare vratam, and listens to the kathā obtains puṇya and their desires. With his blessings, a begger gets money; a jailed person is freed; one becomes free from fear, and gets the fruits of one's desire, and finally goes to the abode of Satya.

इति वै कथितं विप्राः! सत्यनारायणव्रतम्
यत् कृत्वा सर्व-दुःखेभ्यो मुक्तो भवति मानवः १३

विशेषतः कलियुगे सत्यपूजा फलप्रदा
(केचित् कालं वदिष्यन्ति सत्यं ईशं तं एव च) १४

सत्यनारायणं केचित् सत्यदेवं तथापरे
नाना-रूप-धरो भूत्वा सर्वेषां ईप्सित प्रदः १५

O Brahmins. I've told you about the Satyanārāyaṇa-vratam which frees mankind from sorrow. Especially in this kali-yuga, it conferrs all fruits. Some call him "time", and others call him "Lord". Some call him "Satyanārāyaṇa" and other call him "Satyadeva". He has many forms, and bestows everyone's wishes.

भविष्यति कलौ सत्य-व्रत-रूपी सनातनः
श्रीविष्णुना धृतं रूपं सर्वेषां ईप्सितप्रदम् १६

य इदं पठते नित्यं श्रृणोति मुनिसत्तमाः
तस्य नश्यन्ति पापानि सत्यदेव-प्रसादतः १७

In the kali-yuga, śri-viṣṇu wears the form of Satya-vrata, and gives everyone what they desire. The sins of those who read and listen to this story daily are destroyed by the blessings of Satyanārāyaṇa.

# जन्मान्तरानि

व्रतं यत् तु कृतं पूर्वं सत्यनारायणस्य च
तेषां त्वपरजन्मानि कथयामि मुनीश्वराः १८

Now, I will tell you about the future lives of those who performed this vratam.

सदानन्दो महाप्राज्ञः सुदामा ब्राह्मणो ह्यभूत
तस्मिन् जन्मनि श्रीकृष्णं ध्यात्वा मोक्षं अवाप ह १९

Sadānanda become the brāhmaṇa Sudāmā, who prayed to Kṛṣṇa and obtained mokṣa.

काष्ठ-भार-वहो भिल्लो गुहराजो बभूव ह
तस्मिन् जन्मनि संसेव्य रामं मोक्षं जगाम वै २०

The wood-carrier became the bear Guha-rāja who served Rāmaand obtained mokṣa.

उल्कामुखो महाराजो नृप दशरथोऽभवत्
श्रीरङ्गनाथं संपूज्य श्रीवैकुण्ठं तदाऽगमत् २१

Ulkāmukha became king Daśaratha, who prayed to śrī-raṅganātha and went to Vaikuṇṭha.

धार्मिकः सत्यसन्धश्च साधुर्मोरध्वजोऽभवत्
देहार्धं क्रकचै(?)श्छित्त्वा दत्वा मोक्षं अवाप ह २२

Sādhu became Moradhvaja, who gave half of his body to a (?) and obtained mokṣa.

तुङ्गध्वजो महाराजः स्वायंभुरभवत्किल
सर्वान् भागवतान् कृत्वा श्रीवैकुण्ठं तदाऽगमत् २३

Tuṅgadhvaja become Svāyaṁbhu who made everyone into devotees of Bhagavān and went to Vaikuṇṭha.

॥ इति श्री स्कन्दपुराणे रेवाखण्डे सत्यनारायणव्रतकथायाः पञ्चमोऽध्यायः ॥